भूषणैर्भूषयेदङ्गं यथाविभवसारतः
शुचिसौभाग्यवृद्ध्यर्थं आयुर्लक्ष्म्यभिवृद्धये ।
येन केनापि रत्नेन काञ्चनेन विनिर्मितम्
भूषणं धारयेन्नित्यं सर्वदोषविवर्जितम् ।
[1]सुहृत्सु शुभदं नित्यं दर्शनेन प्रजायते
[2]रत्नानि देवतातुष्ट्यै भूषणान्यपि धारयेत् ।
[3]शक्त्या सुरूपं विदधीत धीमान्
भूषाविधिं विश्वविमोहनाय
सुवर्णरत्नै[4]: कलधौतमुक्ता
प्रवालप्रमुखै स्तथान्यैः । ॥ १५० ॥

[5](आदित्ये पद्मरागे च सोमे मुक्ताफलं तथा
मङ्गले विद्रुमं चैव बुधे मरकतं तथा ।
गुरौ तु पुष्यरागं च भार्गवे वज्रमुत्तमम्
मन्दे तु नीलमित्युक्तं राहोर्गोमेदकं तथा ।
केतोर्वैडूर्यकञ्चैव नवग्रहनिवारणम् ।

पाठान्तरे :–

भानौ माणिक्यकञ्चैव चन्द्रे मौक्तिकमेव च
अङ्गारके प्रवालं स्यात् बुधे मरकतं तथा ।

1सुहृच्छुभकरं-आ । 2रत्नानां देवतातुष्टिः भूषणाना विधारणम्–आ ।
3शक्त्यानुरूपं–आ...नुसारं–कठ । 4रत्नाखिलधौत–उ ।
5(आदित्ये...धारणम् आ–ग्रन्थ एव ।

बृहस्पतौ पुष्यरागं शुक्रे वज्राविमिश्रितम्
शनिग्रहे नीलकञ्च राहौ वैडूर्यमेव च ।
केतौ गोमेदकञ्चैव (वैडूर्यमित्युक्तं) नवग्रहनिवारणम्

लोहो रजतहेमानि ताम्रं कांस्यं च पञ्चकम् ।
स्त्रीबालवृद्धघाती च तथा गोब्रह्मघातुकम्
सर्वं पापविनिर्मुक्त्यै पञ्चलोहस्य धारणम् ।

नित्यं भूषणमङ्गमङ्गलकरं श्रेयस्करं कान्तिदं
क्षीराम्भोनिधिकन्यकाविलसितं क्रीडा प्रभा[1]वालयम्

मौक्तिकधारणम् :–

धार्यं मौक्तिकपद्मरागमणिभिः [2]सङ्घट्टितं भूषणं
व्यालिप्ताखिलदिग्वधूमुखतमः स्तोमं सुराणां प्रियम् ।

मुक्ता [3]वली [4]विरचिताभिनवै रमेयै
हारावली वितनुते भवभोग [5]भाग्यम्
दाहातिवृद्धिशमनं वितनोति [6]पित्तं
[7]कान्त्युन्नतिं नयनयोरपि तोषपोषम् ।

[8]([9]लोलम्बिनी यस्य नरस्य कण्ठे
सन्दृश्यते कुन्दतुषार गौरा

---

[1]प्रधानायकम्–आ । प्रधानालयम्–उ । प्रधानान्वितं–क ।
[2]सम्बन्धकं मोहनं–उ । [3]मुक्तादलैर्वि–उ ।
[4]विरचिता तु समै रमेयै आ । भी रचिताभिनवै–क । [5]भाजाम्–आ ।
[6]शैत्यं–आ–क । [7]शान्तिं तथा नयन–उ ।
[8]एष श्लोकः आ–उ ग्रन्थयोरेव । [9]विलम्बिनी–उ । आलम्बिनी–क ।

एकावली तत्सितराग [1]सन्ध्या
तनोति [2]लक्ष्मीमपि कान्तकान्तिम् ।) ॥ १६० ॥

द्विसरम् :–

मुक्ता[3]वलिस्वार्जित [4]शुक्लनीलै
र्यथोचितं निर्मितहारयष्टिः
समीरपित्त प्रशमं [5]करोति
[6]पित्त प्रसादं [7]नयनोत्सवञ्च ।

सुवर्णरुद्राक्षमाला :–

सुवर्णरुद्राक्षकृता मनोज्ञा
माला मलानामपकर्षणी स्यात्

हिरण्यपद्माक्षमाला :–

हिरण्यपद्माक्षकृता तथैव
[8]मुक्तिप्रदा सन्तत धारणेन ।

सुवर्णमाला :–

सुवर्णमाला वितनोति कान्तिं
आयुः[9]प्रदा हन्ति समीरदोषान्

1सङ्घा इति उ–क ।
2लक्ष्मीमुपरान्तकान्ति उ । 3फलै आ–उ ।
4शक्रनीलै आ–उ । 5तनोति–उ ।
6चित्त आ–उ । 7तनुधारणेन–उ ।
8मुत्क्षेपणानन्तर धारिणी च–आ । मुक्तिप्रसादं तनुधारणेन–उ ।
9प्रदात्रीह–आ ।

देहग्रहक्षोभनिवारणाय
विनिर्मिता विश्वविमोहनाय ।

कर्णाभरणम् :–

कर्णाभरणमत्यन्तं कामिनी जनरञ्जनम्
दोषहारि मनोहारि मनोभवनिकेतनम् ।

नवरत्नधारणम् :–

नव[1]रत्नसमुत्कीर्णं नवग्रहनिवारणम्
तथैवाङ्गुलिमुद्रा[2]च सर्वशान्तिं प्रयच्छति ।

अङ्गुलीयकम् :–

पवित्रं पुण्यजननमङ्गुलीयक धारणम्
[3]प्रभुत्व करणं नृणामानन्दसुखदायकम् ।

मुद्रिका :–

लावण्यपोषणं कुर्या द्विन्यासं पदमुद्रिका
सौभाग्यजननी दोषनाशनी मनसः प्रिया ।

नूपुरम् :–

सौन्दर्यवीर्यजननं कामाद्विरद भूषणम्
विचित्ररत्नखाचितं नूपुरं ग्रहशान्तिकृत् ।

ग्रन्थान्तरे :–

जङ्घाभूषार्पित...स्त्रीणामेव विशेषतः
पश्यतां सर्वलोकानां सर्वदानन्ददायिनी ।

---

[1]नवरत्नम् - आ । [2]वा–आ । [3]प्रभक्तिकरणं–आ–उ–क ।

मेखला :–

मेखला नाभिमूलस्था किङ्किणीरत्नशोभिता
पित्तमारुतयो [1]र्मध्ये सीमासूत्र [2]मिव स्थिता । ॥ १७० ॥

कङ्कणादिभूषणानि :–

कङ्कणैरङ्गदै[3]र्न्य स्त कटकाद्यैर्मनोहरैः
भूषितं [4]चित्ररत्नेन भाति जिष्णोर्धनुर्यथा ।

[5](पद्मरागप्रवालाद्यैर्निर्मितं चारुभूषणम्
सर्वलक्षण सम्पूर्णं भक्तिमुक्ति फलप्रदम् ।)

अथ पुष्पाधिकारः

[6](केशक्लेशसमुद्भूत स्वेददुर्गन्धनाशनम्
चक्षुष्यं [7]तापशमनं [8]सौमनस्यस्य धारणात् ।
[9]केशक्लेशशिरोगुरुत्वमलसं तापं विषादं तथा
दुर्गन्धं परिनाशयन् भृशतरं स्वेदोदकं कल्मषम्
चक्षुष्यं रतिवर्धनं सुखकरं सम्पद्यशोवर्धनं
पुष्पाणामतिधारणान्निगदितं कान्तामनोरञ्जनम् ।)

---

[1]मध्यसीमासूत्र व्यवस्थिता–आ । [2]मिति स्मृता–क । [3]र्हस्त–क ।
[4]चित्ररत्नाद्यैर्भाति इन्द्रधनुर्यथा-उ । [5]एष श्लोकः आ–उ ग्रन्थयोरेव ।
[6]केशक्लेश...मनोरथं मन्मथवृत्तिहेतुः (१९१) आ–ग्रन्थ एव । केशक्लेश... घर्मकाले प्रधारयेत् ॥ एष पाठः उ ग्रन्थेऽपि । क–पाठे अधिकः पाठः–माणिक्य मुक्ताफल विद्रुमैश्च गारुत्मतैरप्यथ पुष्पसङ्गैः । वज्रैश्च नीलैश्च कृतं गृहाण गोमेदवैदूर्य युतं सुहारम् । [7]दाहशमनं–उ । [8]सौ मनस्य च–उ ।
[9]एष श्लोकः उ ग्रन्थे नास्ति ।

केशानां [1]सेचनं कुर्यात्कस्तूरीमनुलेपयेत्
सुगन्धीनि सुपुष्पाणि नित्यं [2]शिरसि धारयेत् ।

मिश्रपुष्पधारणम् :–

[3]जीवा (जपा) [4]ह्यालिप्तकश्चैव केतक्याः कोमलं दलम्
जाती कुन्दश्च नेपालं कुटजश्च तथैव च ।

पाटली शतपत्राणि वकुलं चम्पकं तथा
श्रीखण्डश्चैव श्रीपर्णं कस्तूर्या सह धारयेत् ।

मन्दारं [5]कुरुवं चैव नीलोत्पलसुगन्धिके[6]
रक्तोत्पलं यूथिपुष्पं चेन्दुना सह धारयेत् ।

मलिने मल्लिका धार्या निर्मले जातिकौटजे
अभ्यङ्गे केतकी धार्या सततं चोत्पलं धरेत् ।[7]

मकरन्देन संयुक्तं [8]शिरसा धारयेत्सदा
सर्वाण्येतानि [9]तुल्यानि [10]शीतानि रसतस्तथा । ॥ १८० ॥
त्रिदोषशमनार्थाय घर्मकाले प्रधारयेत् ।

वर्षाकालपुष्पधारणम् :–

ह्रीबेरं मरुवं चैव [11]नीलोत्पलसुचम्पकौ
पाटलं कुरुवश्चैव करवीरं सुशोभनम् ।

1लेपनं–उ । 2शीर्षेण–क । 3जवा उ ।
4ह्यालिप्य केतक्याः कोमलं धारयेद्दलम्–उ । 5मरुवं–उ । 6सुगन्धिकम्–उ ।
7अत्र जाती कुन्दं च नेपालं श्रीकण्टं गिरिमल्लिका उ-ग्रन्थेऽधिकः पाठः ।
8सततं धारयेन्नरः–उ । 9माल्यानि-उ । 10रसतो वीर्यत स्तथा–उ-क ।
11वत्सकं नीलमुत्पलं–क ।

नात्युष्णं न च वा शीतं सर्वदोषनिबर्हणम्
निर्मलं नेत्रदोषघ्नं वर्षाकाले प्रधारयेत् ।

शीतकालपुष्पधारणम् :–

केतकी वकुलं पुष्पं श्रीखण्डं शतपत्रकम्
श्रीपर्णं चम्पकं पुष्पं वातश्लेष्महरं परम्
उष्णवीर्यं वातनाशं शीतकाले प्रधारयेत् ।

पुष्पधारणकालनिर्णयः :–

मुहूर्तं जातिकापुष्पं नेपाली चाष्टकं तथा
त्रिरात्रमुत्पलञ्चैव पञ्चरात्रं तु केतकीम् ।

द्विरात्रं शतपत्रञ्च अर्धरात्रं च मल्लिकाम्
अहोरात्रं चम्पकन्तु यूथिपुष्पं तदर्धकम् ।

श्रीकण्ठमेकरात्रञ्च वकुलं माधवीं तथा
अहरेकं तु श्रीपर्णं पुष्पवासं निधारयेत् ।

मन्दारं मरुवञ्चैव करवीरं तथैव च
यावत्कालं वहेद्गन्धं तावत्कालञ्च पाटलीम् ।

जाती त्रिदोषन् सकलाङ्गदाहान्
हरेत्सुगन्धातिशया मनोज्ञा
विदग्धकान्ताजन मोहनीया
निवारयन्ती नयनादिरोगान् ।

तावत्प्रसूनं कुटजं गुणाढ्यैः
त्रिदोषविध्वंसनमूल हेतुः

गन्धेन चैव [1]प्रथितप्रभावं

नवोद्गतं वन्यजनोपभोग्यम् । ॥ १९० ॥

रक्तोत्पलं मत्तविहार हारि

... ...

नेत्रप्रसादं कुरुतेऽतिशैत्यं

मनोहरं मन्मथवृत्ति हेतुः ।)

यूथीं हरति [2]पित्तास्रं क्लेशक्लेद विनाशिनी

सौभाग्यजननी हृद्या दृष्टिसन्तोषकारिणी ।

नखरञ्जनपुष्पाणि :–

[3]नखरञ्जनपुष्पाणां सौरभेणाति विस्मिताः

तिष्ठन्ति मानवा लोके क्षणं चित्रार्पिता इव ।

करवीरपुष्पम् :–

[4]हयमासभवं पुष्पं शिरः कण्डूनिवारणम्

रक्तदोषहरं क्लेश्यं यूकादि विनिवारणम् ।

रक्ततरुपुष्पम् :–

[5]सुरद्रुप्रसवं शस्तं सर्वदा देवतार्चने

विशिष्टगन्धशुभदं दुर्लभं भुवि....दिनाम् ।

---

[1]कथितं पृथिव्यां–क । [2]पैत्यास्यं–आ । [3]रञ्जनद्रुम–आ–क ।

[4]सौभाग्यजननं हृद्यं दृष्टिदोषनिवारणम्–उ ।

[5]एष श्लोकः आ–उ ग्रन्थयोर्नास्ति ।

पाटली :–

पाटल्याः कुसुमं मनोमलहरं पानीयदोषापहं
तृष्णादाह विनाशनाय जनितं [1]श्रेयःप्रदं श्रीकरम्
कान्तिं सन्तनुते विशिष्ट मतिभिः संसेव्यते सर्वदा
पित्तस्योन्नति [2]भञ्जनं सुरभिणा गन्धेन [3]संगर्भितम् ।

चम्पकम् :–

[4]चम्पकं प्रसव [5]मिष्टसुगन्धं
भू सु[6]रामर महीपतियोग्यम्
वातपित्तशमनं खलु वृष्यं
स्वर्णवर्णमपि षट्पदघाति ।

पुन्नागः :–

[7]पुन्नागः [8]कुसुमो मोदश्चित्तविभ्रमनाशनः
शिरो भ्रमण [9]जाड्यादीनपहन्ति विशेषतः ।
पूत्यण्डो मदनोदयो मदकरो वश्यो गुरुर्बृंहणो
बातासृक्कफरक्त कुष्ठपिटकाकण्डूतिजन्तुप्रणुत्
चेतःकान्तिविवृद्धिकृद्विभ्रमतश्चेतोविकारापहा
स्त्रीसौभाग्ययशस्करं वितनुते सौख्यं सदा भूभुजाम् ।

1श्रेयस्करं आ–उ ।
2नाशनम् आ–उ–क ।   3संतर्पितम् आ । संतर्पणं उ । सन्दर्पितं–क ।
4चम्पकप्रसवमिश्रगन्धकम् आ । चम्पकप्रसव गन्धमिष्टदं–उ ।
5गन्धमिष्टदं -क ।   6भूसुरादिक आ; भूसुरासुर–क ।
7पुन्नागकुसुमामोद आ–उ ।   8कुसुमामोदः पित्त क–पाठः
9दाहादी–आ ।पूत्याण्डो...जाम् क-पाठ एव ।

वकुलः—

वकुल[1]द्रुमजं पुष्पं शिरोरोगविनाशनम्
[2]श्रान्ति दुःख प्रशमनं कान्ति सौभाग्य [3]पुष्टिदम् । ॥ २०० ॥

माधवी :—

माधवीसूनमत्यन्तं कफमारुत नाशनम्
[4]श्रुत...नानन्दं कारणाय विनिर्मितम् ।

कुन्दः :—

कुन्दस्य प्रसवं [5]शशाङ्कधवलं [6]कान्तं मनोरञ्जनं
चक्षुष्यं शिरसो हितं वितनुते लावण्यमत्युत्कटम्

यूकाखेदनिवारणाय जनितं चित्तस्य [7]कान्तिप्रदं
श्लेष्माणं विनिवारयेदतितरां[8] वातं समुन्मूलयेत् ।

वासन्तिका :—

[9]वासन्तिकापुष्पमतीव हृद्यं
वातापहं श्लेष्मनिवारणञ्च
मनस्विनी मानवि(मोह)दक्षं
सुगन्धकान्तिं वितनोत्यवश्यम् ।

1वकुलं मृदुलं—आ । 2तद्वद्दुःख-आ । तद्वातदुःखशमनं—उ ।
3वर्धनम्—उ । ग्यमुत्तमम् आः पुष्टिदं—क ।
4स्मृति प्रदं रक्तदोषहरं चानन्दकारकम्-आ । 5तु शङ्ख-क-पाठः ।
6कान्तामनोरञ्जनं-आ । 7शान्तिप्रदं-आ ।
8दतितमं आ । 9पांचालिका-क-पाठः ।

वालुकम् :—

वालुकं [1]हरयेद्दाहं रक्त [2]पित्तविनाशनम्

शीतलं ग्राहि हृद्यञ्च प्रवाह(ण)[3]निबर्हणम् ।

तामरसम् :—

[4]मनोहरं तामरसं लक्ष्मीपुष्टिविवर्धनम्

कुमुदम् :—

कुमुदं शीतलं हृद्यं मृदुगन्धि च पित्तहरम् ।

[5](नात्युष्ण[6]गन्धं सुभगाधिगन्धि

[7]दृष्टिप्रसादं [8]वितनोति [9]कीर्तिम्

शिरोभ्रमं हन्ति शरीर जाड्यं

शतच्छदं [10]वश्यमुदाहरन्ति ।

सन्ध्यावर्तम् :—

नेत्रपुष्पहरं तिक्तं सन्ध्यावर्तप्रसूनकम् ।

मरुवम् :—

मरुवच्छदनं हन्ति समीरणाविजृम्भणम्

[1] विमूकक्षोभञ्च[1]तरसा सुगन्धातिशयं शुभम् ।

1वारये–आ । वातक्त-क । 2पैत्य-आ । पित्तानिलापहं-क ।
3विदारणं–आ । 4मनोहरं···पित्तहरं आ ग्रन्थे नास्ति ।
5एतौ आ-उ-ग्रन्थयोरेव । 6शोतं शुभघातगन्धि-उ ।
7पुष्टिप्रसादं-उ । 8कुरुतेऽतिशैत्यं-क ।
9केश्यम्–उ । 10वर्ण्यं-उ । 11ददाति-उ । करोति-क ।
12आकक्षोभं (अक्षिक्षोभं) आ ।

दवनम् :—

[1]दलं दवनजं हन्ति कफमारुतजृम्भणम्
अतिगन्धश्च देवानां पूजार्थं च विनिर्मितम् ।

दशशोण तुरङ्गानि कुसुमानि हिमानि च
सौरभेणाति शीतेन हानिं पैत्यस्य कुर्वते । ॥ २१० ॥

केतकी :—

सुवर्ण वर्णं [2]यत्पुष्पं केतक्याः सुमनोहरम्
विशिष्ट गन्ध[3] जटिलं[4] तद्द्वात[5]विनाशनम् ।

[6]केतक्याः कुसुमं निहन्ति पवनं श्लेष्माणमुन्मीलयेत्
उष्णत्वं[7] वितनोति कोपमधिकं [8]पैत्यस्य संसेवनात्

कान्तानां हृदयारविन्ददलने सूर्यांशुतुल्यप्रभं
कन्दर्पोत्सवमूलकन्दममलं भूपैस्सदा भुज्यते ।

केसरेण [9]सहितं शुभदक्कृत केतकीवकुल जातिषु मध्ये
ईश्वरस्य नयनानलदग्धं मन्मथं जनयितुं पुनरेव ।

ऋतुषु विशेषाः :—

हेमन्ते शिशिरे शतच्छदमयी [10]मालाति सौख्यप्रदा
केतक्याः कुसुमं वसन्तसमये ग्रीष्मोदये कौटजम्

1एष आ-ग्रन्थे नास्ति । 2यत्पुष्पं-आ-उ-क । 3जनितं-उ ।
4जटिलमेतद्वात-आ । 5विवर्धनम्-उ । 6एष आ-उ ग्रन्थयोरेव ।
7उष्णत्वाद्धि-उ । 8पित्तस्य-उ । 9सदृशं न हि दृष्टिं-क ।
10पाठाति-क ।

पुष्पं जाति समुद्भवञ्च कथितं वर्षागमे पाटली
संसेव्या शरदागमे सति सदा रक्तोत्पलं धारयेत् ।

पाठान्तरे :–

[1](त्रिदोषशमना जाजी महादाहविनाशिनी
सुगन्धं दोषशमनं कोटरं पुष्पमुच्यते ।

पित्तहृद्विशदं शैत्यं चक्षुष्यं चोत्पलं तथा
श्लेष्मवातप्रशमन मुष्णभावं च निर्मलम् ।

पुष्पाणां प्रवरं श्रेष्ठं केतकी पुष्पमुच्यते
ईषदुष्णं सुशीतं च सुगन्धं पुष्टिदायकम् ।

शिरोभ्रमविनाशश्च शीतपत्रं सशोभनम्
आधार्यं मल्लिकापुष्पं दृष्टिहानिस्तु जायते
चम्पकं वातशमनं चक्षुष्यं विशदं शुभ(द)म् ।

पाटलं च महाशीतं श्लेष्मवातप्रवर्धनम्
मन्दारं पित्तदोषघ्नं कर्णबाधिर्यनाशनम् ।

पाटलं धारयेद्यस्तु मरुवेण समन्वितम्
ज्वरमूर्च्छामवातघ्नं चक्षुष्यं दाहनाशनम् । ॥ २२० ॥

हेमन्ते शिशिरे चैव शतपत्रं तु शोभनम्
वसन्ते केतकी धार्या घर्मे नेपाल मालती ।

वर्षे श्रीण्ठ पाटल्या शारदे चम्पकं वहेत्
रक्तोत्पलं सर्वकालं धरेल्लक्ष्मीविवृद्धये ।

---

1 त्रिदोषशमना···स्त्री समृद्धये-एते आ-ग्रन्थे एव विद्यन्ते ।।

प्रातःकाल कदम्बकम् :—

पनसानि सुसूक्ष्माणि केकानि मरुवं तथा
ऐरावतस्य पुष्पाणि करालाग्राणि यानि च ।

चम्पकं कुसमं रक्तं करवीरस्य कुट्मलम्
केसराणि सुगन्धीनि ब्रह्मदारुभवानि च ।

माचिपत्रं सुपुन्नाग कुसुमैरपि संयुतम्
एतत्कदम्बं मदनकदनोद्भेदनं परम् ।
वृष्यं पैत्यहरं श्लेष्म....नाशं पदापयेत्

पूर्वयामधारणम् :—

पाटलं करवीरञ्च मरुवं माधवीसुमम् ।

वकुलेन समायुक्तं पूर्वयामे प्रदापयेत्
सर्ववश्यकरं राज्ञां पूर्ववत्सल मादिशेत ।

इत्थं पवित्रं वृष्यं स्याद्यशस्यं प्रीतिवर्धनम्

फलधारणम् :—

उदुम्बरफलं पक्वं सुगन्धि कदलीफलम् ।

परिपक्वं कपित्थञ्च मातुलुङ्गफलं तथा
एकैकं धारयेत्प्रातः सर्वं वा युग्ममेव वा

कान्ति तुष्टिञ्च सन्तोषं कुर्यात्पैत्यस्य नाशनम् ।

मध्याह्नकाल कदम्बकम् :—

पुन्नागं माधवीपुष्पं नेपालं करवीरकम्

रक्तोत्पलं चम्पकञ्च मरुवं मधुकैः सह । ॥ २३० ॥
ह्रीबेरेण समायुक्तं मध्याह्ने मेहभञ्जनम्

न च शीतं न चोष्णञ्च त्रिदोषशमनं भवेत् ।
चम्पकं केतकीपुष्पं ह्रीबेरेण समन्वितम्
सर्वदोषहरं वृष्यं सर्वसौभाग्यवर्धनम् ।

सायङ्काल कदम्बकम् :—

मरुवं राक्षसः (?) पुष्पं माधवी कुसुमैस्सह ।

अथवा राक्षसः (?) पुष्पं कस्तूर्या सह धारयेत्
सायङ्काले विशेषेण वातश्लेष्महराय च ।

रात्रिकदम्बकम् :—

मालतीचम्पकं पुष्पं कर्पूरशकलैः सह
कस्तूर्या निशि यत्प्रोक्तमेतत्सुरतरञ्जनम् ।
सर्ववश्यकरं राज्ञां सर्व दोषहरं परम् ।

पुष्पधारण कालोचितकृत्यानि :

पुष्पाणां धार्यकाले मृदुतरशयने गाढमालिङ्ग्य नारीं
रम्यं चावेक्ष्य वस्त्रं स्तनतटमसकृच्चन्दनाङ्कं मृदित्वा

नाभिं स्पृष्ट्वाथ दत्त्वा मृगमदशशिसम्पृक्तताम्बूलमास्ये
दत्त्वा धम्मिल्लपुष्पं मृगमदतिलकं घ्राणयेत्स्त्रीसमृध्द्यै ।

पुष्पवर्ज्याः :—

मालां पर्युषितां महीतलगतामन्योपभुक्तां तथा
प्रायो रक्ततुरङ्गमारमिलितां मालिन्यवस्त्रावृताम्

निर्माल्य प्रभया परैर्विराचितां कायेन चित्तेन वा
नो देवाय समर्पितां परिहरेद्बुद्ध्वा स्वहस्तेन वा ।

[1]लक्ष्मीकराणि :—

लक्ष्मीर्बिल्ववने कदम्बकुसुमैः पुण्याङ्गना...
... ...

...सलक्षणगृहे गङ्गाजले गोकुले
वेश्यामङ्गलदर्शने वसति श्रीर्विष्णुवक्षःस्थले ।

गुरवो यत्र तिष्ठन्ति धान्यं यत्र सुसाञ्चितम्
न बन्धुकलहो यत्र तत्र लक्ष्मीः सुसंस्थिता । ॥ २४० ॥

यानि कानि च माल्यानि यत्किञ्चिदनुलेपनम्
अलक्ष्मीपरिहारार्थं नित्यं कुरु युधिष्ठिर ।

शिरस्सु पुष्पं चरणौ सुपूजितौ
पराङ्गनासेवितमल्पभोजनम्
अनग्नशायित्व मपर्वसङ्गमं
श्रियः प्रनष्टाः पुनराश्रयान्ति ।[2]

...कुसुमं धत्ते न वस्त्रकरपीडितम्
शीघ्रभोजी चिरस्नायी तेन मे रावणःप्रियः ।

1लक्ष्मीकराणि...वित्तमायुर्विनश्येत् एते श्लोकाः आ-ग्रन्थे न सन्ति ।
उ-ग्रन्थे-एतद्भागो नष्टः ।

2क-पाठे अधिकः श्लोकः—यामार्धं जातिपुष्पं विशदपरिमलं कौटजं याममात्रं वर्ण्यं रक्तोत्पलञ्च त्रिदिनमपि तथा केतकी पञ्चरात्रम् । मल्लीपुष्पं द्वियामं शतदलकुसुमं द्वित्रिरात्रिप्रदिष्टं, यूथीसञ्जातपुष्पं दिनमुदितमिदं पुष्पभोग-प्रमाणम् ।

अलक्ष्मीकराणि :—

स्वयं विरचिता माला स्वेन घृष्टश्च चन्दनम्
स्वयमेवासनं दत्त्वा शक्रस्यापि श्रियं हरेत् ।

आपोशनं……..तैलाभ्यङ्गं तथैव च
स्वयं करकृतं दोष अयुश्रीबलनाशनम ।

कुचेलिनं दन्तमलप्रधारिणं
बह्वशिनं निष्ठुरभाषिणञ्च
सूर्योदये चास्तमये च शायिनं
विमुञ्चति श्रीरपि चक्रपाणिनम् ।

… … … …
… … … …
पानागारे मलिनवसने
सन्ध्यायोगः शय्या ।

तत्तत्स्थाने कुमुद…
…. . . . . स्त्रीरतायाम्
देवी ज्येष्ठा वसति सततं
ना . . . . ।

अजखरमहिषपादधूलि
स्तुषगणिका परिमार्ज…
परमुखपरवस्त्र शूर्प जन्मा
मरुदपि देहभृतां करोत्यलक्ष्मीः ।

द्राक्षा तु कदलीनिम्ब . . . .

यस्मिन् गृहे प्रवर्तन्ते तद्गृहं नश्यति क्षणात् । ॥२५०॥

अगस्त्यः करवीरश्च सन्ध्यावर्तश्च किंशुकाः

कटुःकार्पासिकश्चैव षडेते गृहनाशकाः ।

पाठान्तरे :—

जम्बूकपित्था वराहकार्णिधत्तूर

काश्वत्थ विभीत केक्षवः

आमण्डनिष्पावकराजमाषा पर्यङ्कपालि

गिरिकर्णिकाः... ।

एते वृक्षा यस्य गेहे प्रवृध्दा

स्तस्य स्थानं वित्तमायुर्विनश्येत्

एकोऽनड्वान् गोत्रयं सप्तसंख्याः

श्वेताश्वाः...रत्नसंख्या गजाश्च ।

... . चतुष्कं

दास्यः पञ्च ब्राह्मणाः सप्तसंख्याः

रुद्रा भृत्याः वह्नि संख्याश्च दाराः

ष .... ब्रह्मचारित्रयश्च ।

एते वर्गा यस्य गेहे . . . . च

तेजोहानिर्वित्तमायुर्विनश्येत् ।

[1]यावद्दधाति सुगन्धं कुरुवककरवीर कुसुमानि

तावत्सुरतरुपुष्पं कथितं जलवासिनीपुष्पम् ।

1द्वौ श्लोकौ क-पाठ एव ।

वस्त्रानीतं करानीतं आनीतं चार्कपत्रतः
एरण्डपत्रादानीतमयोग्यं कुसुमं भवेत् ।

अथ लेपाधिकारः

श्रीखण्डखण्डागरुदेवदारुसुगन्धम्...कचोरयुग्मं
श्रीवासधान्याकनिरामयश्च वालद्वयं गुग्गुलुधूपम् ।

रास्नाजटाकुष्ठहरीतकश्च दर्भद्वयं चन्दनबीजसारं
चूर्णीकृतं तैलचतुर्गुणेन युक्तं निषिक्ते लघुलोहभाण्डे ।

घर्मे विनिक्षिप्य च गन्धभाण्डकस्तूरियोगैः परिमिश्रितश्च
कस्तूरिकाकुङ्कुमचन्द्रयुक्तं पुष्पैः सुगन्धैः बहुवासितश्च
वसन्तकाले शरदागमे च तैलं हितं घर्मजरोगशान्त्यै ।

आलेपनाध्दातुविवर्धनं स्याद्वर्ण्यं हितं त्वग्गतया निहन्ति
अशीतिवातानपहन्ति शीघ्रं सौभाग्यसम्पत्करमातनोति ।॥ २६० ॥

[1]श्रीखण्डादिविलेपनं तनूभृतामङ्गेष्वनङ्गोत्सवं
क्रीडालम्पट चेतसामतितरामानन्दकन्दाङ्कुरम्

कक्षोरःस्थलकण्ठनाल[2]निगमं दुर्गन्धनिर्नाशनं
वर्ण्यं वातकफास्र[3]पित्तशमनं सौभाग्यदं मोहनम् ।

संसृष्टलेपनम् :–

कस्तूरिका [4]कुङ्कुमचन्दनेन्दु
विमिश्रितं दोषसमूहघाति

---

[1]श्रीखण्डादि...मोहनम्–उ–ग्रन्थे । [2]विगलद् गंन्धि–आ–क ।
[3]पैत्य–इति आ पाठः । [4]चन्दनकर्दमेन्दु– उ । चन्दनदर्पमिन्दु–आ–क ।

प्रसून सौरभ्ययुतं [1]तदेव
विलेपनं विश्वविमोहकारि ।

सामान्यलेपनम् :-

लेपं चन्दनकर्दमेन [2]रचितं सौभाग्य सम्पत्करं
पुष्टिं सन्तनुते [3]विसर्पकहरं [4]पित्तास्रकोपं हरेत्
दाहं देहगतं [5]भिनत्ति तरसा तत्तद्दतौ तद्गुणं
पुण्यैः पूर्वकृतैर्विशिष्टमनुजै[6]र्यत्ताद्विना लभ्यते ।

श्रीखण्डालेपनम् :-

ईश्रन्मृगमदसहित (ताच) श्चन्दनकर्पूरकुङ्कुमैर्मिलितः
लेपाद्भवति शरीरे कान्तिः पुष्टिश्च [7]रम्यता कापि ।

शीतकाललेपनम् :-

[8]कुङ्कुमं चन्दनञ्चैव कृष्णागरुविमिश्रितम्
उष्णभागमिदं श्रेष्ठं शीतकाले [9]प्रयोजयेत् ।
आदौ चोद्वर्तयेद्गन्धं [10]पश्चाद्गन्धं प्रलेपयेत ।

1तदैव–आ । तथैव–उ । 2रचितः–उ ।
3विसर्पहरणं–उ । 4पैत्यप्रकोप–क ।
5हिनस्ति–उ, गतं च हन्ति–आ । 6यत्नं विना–आ–उ–क ।
7रम्यता चैव–उ ।
8कुङ्कुमं...दोषान् (२६८) एते श्लोकाः उ ग्रन्थे न ।
9तु लेपयेत्–आ । 10पश्चात्त्वक्च–आ ।

उष्णकाललेपनम् :–

चन्दनं घुसृणोपेतमीषत्कस्तूरिकायुतम्
न चोष्णं [1]च न शीतं च वर्षाकाले [2]प्रधारयेत् ।

हेमन्तलेपः :–

[3]कालागरुस्नेहविमिश्रितेन कस्तूरिकाचन्दनमर्दितेन
काश्मीरपङ्केन कृतप्रलेपो हेमन्तकालेषु निहन्ति दोषान् ।

[4]दाहं देहगतं निहन्ति, [5]सलिलं हैमप्रसूना[6]हतं
[7]शीतं शैशिर वासरेषु [8]सहितं वातप्र[9]वृत्त्यास्पदम्

[10]नेत्रानन्दकरं शरीरविगल [11]द्दुष्टाम्बुसंशोषणं
पित्तस्योन्नति [12]भञ्जनं श्रमहरं पुष्टिप्रदं कान्तिधृत् ।

शिशिरकाललेपः :–

कुङ्कुमेन सह घृष्टचन्दनं
कृष्णलोहसहितं [13]जवादिना
लेपितं मृगमदेन [14]संयुतं
[15]दोषिजच्छिशिरकालहितं स्यात् । ॥ २७० ॥

---

[1]न च-आ । [2]तु लेपयेत्–आ ।
[3]एष श्लोकः आ ग्रन्थे नास्ति । [4]एष आ–उ ग्रन्थयोरेव ।
[5]नितरां हेम–क । [6]नावृतं–आ । [7]पीतं–आ–क ।
[8]निहितं–आ । [9]प्रवृद्धिं नयेत् आ । प्रवृध्दास्पदं–क ।
[10]नेत्रे शैत्यकरं आ । [11]विगलद्घर्माम्बु आ ।
[12]हारकम्–आ–क । [13]जपादिना-आ । [14]च युक्तं–क ।
[15]हारि दोषनिचयं चिरोद्भवं–इति आ–पाठः । दोषलं–क–पाठः ।

वसन्तकाललेप :–

वसन्तकाले घुसृणेन युक्तः
कस्तूरिकाचन्दन [1]चारुलेपः
आवासितश्चेन्नवमाल्लिकाभिः
त्रिदोषजिन्मन्मथ जन्मभूमिः ।

ग्रीष्मकाललेपनम् :–

[2]हिमसलिलविमिश्रं चन्दनं चन्द्रयुक्तं
.... हृद्यैर्हल्लकाद्यैः प्रसूनैः
अपहरति जनानां तापमालेपमात्रे
अखिलमपि निदाघे निष्पतद्दाहमोहम् ।

वर्षाकाललेपः :–

विघृष्टकृष्णागरुकुङ्कमाभ्यां
कस्तूरिकाचन्दन [3]सार्द्रलेपः
[4]पुष्पैस्सुधूपैः परिवासितस्य[5]
वर्षासु [6]वातादि [7]निवारणं स्यात् ।

1सार्द्रलेपः–आ ।

2हिमसलिलविघृष्टं चन्दनं चारुयुक्तं, क्षपयति परिलेपः (पात्) प्राणिनां तीव्रतापम् । कलितमपि सुगन्धैर्हल्लकानां तथैव, दिशति शिशिरसौख्यंघर्मकाले घनान्ते । आ–उ–क, किन्तु चन्द्रयुक्तं हिमं हि–इति आ ।

3सान्द्रलेपः–आ–क ।

4पुष्पेषु–उ । सान्द्रैस्सुधूमैः सहसा निहन्याद्वर्षासु वातादिभवान्विकारान्–क ।

5वासितश्च–आ । 6वासो हितमामनन्ति–उ ।

7निवारणाय–आ ।

शरत्काललेपः :—

श्रीखण्डखण्डेन [1]सुपेषितेन
हिमाम्बुयुक्तेन सुवासितेन
जाती प्रसूनैः परिलिप्तगात्रो
[2]नरो जयेच्छारददोष[3]कासम् ।

...[4]तण्डुलं गौर .... मुख्यशोभनदेवताः
श्रीकारं शत्रुनाशं च सर्वसौभाग्यकारणम् ।

.... तण्डुलं रजनिशुक्तिसंयुतं
विप्रमुख्यस्य ललाटसुस्थितम्
श्रीकारं युवतिसङ्घवाञ्छितं
शोभनं सुखकरं वशीकरम् ।

.... तिलाक्षतविमिश्रन्तु महादेवाप्रियं शुभम्
सर्वपापहरं नृणां रुद्रभृत्यैः प्रशस्यते ।

चन्दनभेदाः :—

चन्दनं त्रिविधं विद्याद्रक्तं पित्तं च पाण्डुरम्
उत्तमं रक्तवर्णं च मध्यमं पीतवर्णकम् ।

अधमं पाण्डुरं विद्याद्गन्धज्ञानविशारदः
श्रेष्ठं मलयसञ्जातं यवनोत्थं तु मध्यमम् ।

---

[1]सुधूपितेन—उ । [2]सदा—क । [3]कोपम्—आ—उ ।
[4]तण्डुलं......मश्नुते (२९३) एते आ—उ ग्रन्थयोर्न ।

बर्बरेष्वधमं दुष्टं पाञ्चालयवनादिषु
चन्दनस्यतु चिह्नानि ग्रन्थि कोटर खर्पराः । || २८० ||

खादने कटुकं तिक्तं घर्षणे पीतवर्णकम्
छेदने रक्तवर्णञ्च श्रेष्ठं चन्दनमुच्यते ।

[1]चन्दनं चेन्दुना युक्त कर्पूरेण विमिश्रितम्
सुगन्धं च सुशीतं च घर्मकाले तु लेपयत् ।

श्रीगन्धगुणाः :–

शीतं चन्दनमङ्गदाहाविभजि . . . कान्तिदं
कण्डूकुष्ठविसर्पदाहशमनं रक्तप्रमेहापहम्
तृण्मूत्रप्रदरभ्रमश्रमहरं लक्ष्मीकरं हृद्य . . .
. . . . क्षतनेत्ररोगशमनं तिक्तं कषायान्वितम् ।

[2]श्रीगन्धं कृमिकुष्ठहारि विशदं तिक्तं कषायान्वितं
शीतं हृद्यमरोचकभ्रमलन प्रध्वंसि[3]पैत्यापनुत्

बल्यं वर्णकरं विदाहशमनं मोहापहं प्रीणनं
मूर्च्छाछर्दिविसर्पकेषु च हितं स्वर्ग्यं परं श्रीकरम् ।

रक्तं पीतं गुरुस्निग्धं ग्रन्थिकर्कशकोटरम्
तिक्तं शीतलगन्धाढ्यं चन्दने दशकं शुभम् ।

श्वेतं रूक्षं लघु श्लक्ष्णं निस्सारं वह्नितापितम्
शाखाबर्बरानिर्गन्धं श्रीगन्धं दशधा त्यजेत् ।

---

[1]एष आ ग्रन्थ एव । [2]श्रीगन्धं··· ...त्यजेत् । (२८६) एते आ ग्रन्थ एव ।
[3]पित्तास्रजित्–क ।

गोपीचन्दनम् :–

गोपीचन्दनमङ्गदाहशमनं पित्तस्य शान्तिप्रदं
कानाक्लेशनिवारणाय जनितं लक्ष्मीनिवासास्पदम्

पापानां . . . हन्ति तरसा शोकस्य . . . .
पुण्यैः पूर्वकृतै र्विशिष्ट मनुजैर्यस्मात्सदा धार्यते ।

विभूतिः :–

पुण्यं गोमयभस्म भाग्यजननं श्लेष्माणमुन्मीलये-
द्वातघ्नं . . . . जूर्तिवेगजननं रक्तस्य शान्तिप्रदम्

प्रीतिर्लोकगुरोस्तनोति नितरां पाखण्डसञ्जीवनं
भीतिं हन्ति पिपीलिकादि जनित . . . . पित्तं जयेत् ।

अनुलेपनम् :–

मदमूर्च्छाभ्रमहरं स्मृत्योजोबलवर्धनम्
श्वेतदौर्गन्ध्य वैवर्ण्य श्रमघ्नमनुलेपनम् ।

तश्च लेपनं कुर्यात् देवताभ्यो निवेदनम्
चन्दनागरुकर्पूरकस्तूरीकुङ्कुमादिभिः । ॥ २९० ॥

शतपत्राम्बुसंमिश्रं लेपनं . . . पेषितम्
नरश्चन्दनदानेन सर्वपापैः प्रमुच्यते ।

तथा कर्पूरदानेन सर्वान्कामानवाप्नुयात्
कस्तूरिकाप्रदानेन यशस्वी भुवि जायते ।

चन्दनागरुकर्पूर कस्तूरी कुङ्कुमादिकम्
यक्षकर्दममेते . . . . मश्नुते ।

कस्तूरी :–

कस्तूरी कफहा [1]कषायकटुका [2]तिक्ता सुगन्धप्रदा
लक्ष्मीपुष्टियशस्करी विषहरी कान्तिप्रदा [3]बृंहणी
वृष्या वश्यकरी मरुत्क्रिमिहरी [4]घ्राणेन्द्रियाह्लादिनी
कण्डूपूतिविनाशिनी रुचिकरी [5]लावण्यतापादिनी ।

कस्तूरीपरीक्षा :–

[6]या वर्णतः पिञ्जरकान्ति. . . .
या केतकीपुष्पसमानगन्धा
या वक्त्रसंस्था कटुकोष्णतिक्ता
या चेत्तुलायां लघु (धन–क) तामुपैति ।

या मर्दिता चिक्कणतामुपैति
या भस्मतां नैति कदाचिदेव
या छेदिता निस्वनसङ्कुलाग्नौ
या चर्मसञ्जात समानगन्धा

सा जातिशुध्दिर्मृगनाभिरिष्टा विवेकराजन्यकुमारयोग्या।
[7]अन्यत्करतलजलमध्ये स्थापयित्वा मुहूर्तं

1कफहृत्कषाय–आ । 2लिप्ता–क ।
3वातहृत्–आ । 4घ्राणेन्द्रि...आ ।
5लावण्यदा दीपनी–आ ।
6...वर्णतः...जवादि स्मृता (३०५) एते आ ग्रन्थे न ।
7या स्थापिता हस्ततले सतोये क ।

पुनरपि तदवश्यं चिन्तनीयं . . .
यदि भवति न रक्तः तज्जलं पीतवर्णं
... ... मृगनाभि ... ... ।

किञ्च :–

यो गन्धं केतकीनां वहति परिमलं वर्णतःपिङ्गलाभः
स्वादे तिक्तः कटूष्णः परिलघु
... मर्दने चिक्कणः स्यात्
दग्धो यो याति भस्मं . . . चर्मगन्धो दृढाग्नौ
शुध्दोऽसौ . . . भवति मृगमदो राजदेहस्य योग्यः ।

पाठान्तरे :–

केतकीगन्धवद्गन्धं तुलास्ये लघुतां व्रजेत्
घर्षणे चिक्कणं याति कस्तूरीति . . . . ।

[1]**कस्तूरीगुणाः–**

कस्तूरी सकषायतिक्तकटुका क्षारा कदुष्णा लघु
स्निग्धा बद्धमला त्रिदोषशमनी बल्या मृदु बृंहणी
वातासृक्कृमिदोषशोफवमथुत्वग्दोषवीसर्पजित्
कण्डूकर्कशदुष्टमेहपिटका क्षीणेन्द्रियत्वापहा । ॥ २०० ॥

1क–पाठ एव अधिकाः श्लोकाः–कस्तूरिका वेद्य (?) मुष्णा सुगन्धा मदनप्रदा । मार्गो...मृगमदा मृगनाभिमृगाण्डजः ।। कस्तूरी कटुका तिक्ता क्षारोष्णा शुक्रला गरुः । कफवातविषच्छर्दि शीतदौर्गन्ध्यदोषहा । काश्मीरे कपिलच्छाया नेपाले चैव लोहिता । कामरूपोद्भवा कृष्णा कस्तूरी त्रिविधा मता ।। कामरूपोद्भवा श्रेष्ठा नेपालोत्था च मध्यमा । काश्मीरदेशसम्भूता कस्तूरी त्रिविधा मता ।।

मतान्तरम् :—

कस्तूरी विषरक्तदोषशमनी रुच्या परं बृंहणी
.... कान्तिकरी त्रिदोषशमनी सौभाग्यसंपत्करी

जन्तुघ्नी प्रवरा सतिक्तकटुकप्राया ....
सौख्यं सन्तनुते यशोदयकरी नेत्रोत्सवोत्पादिनी ।

अन्यमतम् :—

कस्तूरी कफरक्तवातशमनी हृद्या सुगन्धिप्रदा
सौभाग्यप्रवरा यशस्करकरी वश्या परं बृंहणी

वृष्या कान्तिकरी शुभाशुभकरी लावण्य लक्ष्मीकरी
यक्ष्माशोफविषापहा श्रमहरी तिक्ता कषाया ... ।

किञ्च :—

कस्तूरी स्मरमन्दिरे च वदने फाले .... वक्षसि
... कुचमण्डले च कुरुते शोभां कुरङ्गीदृशाम्

तद्वत्कक्षकचाक्षिसन्धिषु ... सौख्यार्थमेवं भजे
त्सा स्यात्सर्वरुजापहा नृपजनैर्नित्यं सदा सेव्यताम् ।

जवादिपरीक्षा :—

...... ईषत्पिङ्गांशु ......
आतपे भवनामोदा राज्ञां योग्या न चान्यथा ।

जवादिगुणाः :—

शुद्धा राजकुमारभोगसुखदा सौभाग्यपुष्टिप्रदा
वृष्या ... मलादिमोचनकरी हृद्या सुगन्धिप्रदा

दोषघ्नी च शिरोभ्रमादिशमनी कान्तामनोरञ्जनी
भूतप्रेतपिशाचयक्षशमनी श्रेष्ठा जवादि स्मृता ।

[1]जवादी नाम विख्याता शुभदा पार्वतीप्रिया
यशस्करी पुष्टिकरी भूभुजश्शिरसा धृता ।

हृदयाह्लादि गन्धाढ्या [2]मितकेतक मिश्रिता
उष्णवीर्या मृगोद्भूता कफमारुत [3]कष्टहृत् ।[4]

[5]काश्मीरम् :—

काश्मीरं कफवातहारि विशदं कण्डूक्रिमिघ्नं परं
बल्यं वर्ण्यमशेषरोगहरणं सौभाग्यलक्ष्मीप्रदम्
पुष्यं पावनमूर्ध्वजत्रु जनिते रोगे च नस्ये हितं
कुष्ठ[6]श्वित्रहरं सुगन्धि ललनाढ्यं च रागे हितम् ।

काश्मीरपरीक्षा :—

[7]अतिरक्तं चिक्कणं च सूक्ष्ममुत्पलगन्धि च
काश्मीरदेश सञ्जातमुत्तमं कुङ्कुमं भवेत् ।

अपाण्डुरखरश्चैव स्थूलकेसरसंयुतम्
मधुगन्धि च विज्ञेयं पारशीकञ्च कुङ्कुमम् । ॥ ३१० ॥

1एष आ–ग्रन्थ एव । 2भवेत्केतक–क । 3कुष्ठहा–क ।
4जवादिलेपनं कुर्याद्धेमन्ते शिशिरेऽपि वा । बाहुमूले श्रवणयोर्नाभिकण्ठस्थलेषु च उत्तमाङ्गाधरोष्ठे च पादाङ्गुष्ठेषु प्रलेपयेत् ॥–क ।
5कुङ्कुमं कफहरं पवनघ्नं त्वग्गिननाशहरणं व्रणहारि। व्यङ्गकुष्ठपिटकादिविनाशं श्रीकरं वितनुते मुखकान्तिम् ॥ अधिकः क–पाठः । 6स्वेद–क ।
7अतिरक्तं...कृष्णागरु स्यात् (३३०) एते आ–ग्रन्थे न सन्ति ।

बाह्लीकजातं विज्ञेयं कुङ्कुमं पाण्डुवर्णकम्
केतकीगन्ध संयुक्तं सूक्ष्मकेसरसंयुतम् ।

कर्पूरपरीक्षा :—

स्वच्छं शृङ्गाभपत्रं लघुतरविशदं . . .
. . . . . सुहृद्यं बहुलपरिमलं सम्बन्ध . . . .
निस्नेहं दार्ढ्य . . . शुभतरमति चेद्राजयोग्यं प्रशस्तं
कर्पूरं ।

कर्पूरगुणाः :—

. . . . मधुरं शीतं सरं भेदनम्
चक्षुष्यं विशदं कफास्रविस्रजि . . . .

कण्डूतिक्रिमिहृत्क्षतक्षयहरं कान्तिप्रदं श्रीकरं
जिह्वास्तम्भगलग्रहस्य जडता . . . दुर्गन्धजित् ।

कटुकमधुरः पीनसकरः
तृष्णादाहं हन्या जनित व्याधिशमनः ।

[1]हिमास्तिक्तप्रायः कटुमधुरकृत्पीनस[2]हरः
तृषादाहं हन्यान्नयनजनितव्याधिशमनः

हितोऽसौ पैत्यार्तौ [3]दिशति च निदाघे न तु हिमे
परं चैतद्वीर्यं वितरति रुचिं चामलशशिम् (?) ।

प्रत्यन्तो मदनोदयो मदकरो वृष्यो गुरु बृंहणो
वातोद्यत्कफपैत्यकुष्ठापिटका कण्डूतिजन्तुप्रणुत्

---

[1]एतौ आ–क–ग्रन्थयोरेव । [2]करः–क । [3]शरदि च–क ।

चेतःकान्तिविवृध्दिकृद्विषहरः चेतोधिकारापहः
श्री सौभाग्ययशस्करो वितनुते सौख्यं सदा भूभुजाम् ।

[1]कर्पूरं कफगर्वशोषणकरं मेदोहरं श्रीकरं
कण्डूघ्नं च समस्तजन्तुनिकरप्रध्वंसनं स्रंसनम्

नानास्रावहरं गलग्रहगदप्रध्वंसि पित्तप्रदं
जिह्वास्तम्भकरं सतिक्तमधुरं दौर्गन्ध्यपैच्छिल्यनुत् ।

कर्पूरभेदाः :—

तत्रोत्तमनिशं सन्ति पक्षिकोदयभास्करे(?)
ईशावासं हिक्करिं च गन्धशास्त्रविशारदाः ।

त्रीण्याहुर्घनसारं च दग्धाख्यं हिमवालुकं
चीनाख्यं दग्धनामानं कष्टात्कष्टतरं विदुः ।

सर्वाणि कर्पूराणि :—

कर्पूराणि च सर्वाणि पित्तलानि विशेषतः
पीतकर्पूरकः श्रेष्ठस्तत्र जन्या वरा मता । ॥ ३२० ॥

सर्वं नवमभिष्यन्दि कर्पूरं .... उच्यते
पुराणं सर्वदोषघ्नमिति केचित्प्रचक्षते ।

कर्पूरवर्जाः :—

तैलपीतः... ... पित्तरोगवान्
परित्यजेत्स कर्पूरं ज्वरी चैव विशेषतः ।

1कर्पूरं...विदुः—क पाठ एव ।

हिक्करि :—

अत्युत्तमं हिक्करिनामधेयं,
कर्पूरपिष्टं भजतां नराणाम्
त्रिदोषवैवर्ण्यहरं क्रिमिघ्नं
नेत्रामयघ्नं लघु दीपनीयम् ।

गोरोचना :

गोरोचना शिशिरा विषदोषहन्त्री
भूतग्रहोपशमनं कुरुते च पथ्या
शृङ्गारमङ्गलकरी जनमोहनीया
रुच्या च पाचनकरी क्रिमिकुष्ठहन्त्री ।

पूत्यण्डा मदमोहनी ··· वश्या गुरु बृंहणी
वातासृक्कफपित्त कुष्ठपिटकाकण्डूति—प्रणुत्

रेतःकान्ति विवृद्धिकृद्विविशदश्चेतो विकारापहा
श्रीसौभाग्ययशस्करी वितनुते सौख्यं सदा भूभुजाम् ।

मृगनाभि······शशिकस्तूरिकान्वितः
मदनो विभ्रमो लक्ष्मीः वातपित्तकफार्तिजित् ।

अगरुः :—

दुर्गन्धं हन्ति तिक्तं सकटुकमगरुस्वेदमेदोकफघ्नं
श्रोत्रे नेत्रे हितमनलहरं स्निग्धमुष्णं क्रिमिघ्नम्

अगरु लं तीक्ष्णमुष्णं सकटुकमुदितश्लेष्ममेदोऽनिलघ्नं
हृद्यं प्रहन्यात् क्रिमिकुलशमनं पित्तरक्तापहञ्च ।

अगरुयोजनम् :—

शशिकस्तूरी संयुक्तं शतपत्राम्बुमार्दितम्
सुगन्धमगरुस्नेहः किञ्चि....त्तापित्तजित् ।

कक्षभागे...नाभौ......योरपि
स्वेददौर्गन्ध्य नाशार्थं मालिप्येदगरुद्रवम् ।

कृष्णागरुः :—

उष्णं तिक्तं दीपनं ग्राहि हृद्यं
वातस्थौल्ये श्लेष्महारि....स्यात्
मेदोऽनिलघ्नं सूर्यावर्तं कर्णशूलार्दितञ्च(?)
कण्डूकुष्ठं हन्ति कृष्णागरु स्यात् । ॥ ३३० ॥

कृष्णागरु स्नेह[1]मिदं सुगन्धि
कफापहं कुष्ठकिलासघाति
विचर्चिकामण्डलदद्रुकण्डून्
विनाशयत्याशु समीरणञ्च ।

रक्तचन्दनम् :—

[2]रक्तं चन्दनं शीतलं तिक्त
मस्रमददाहशोषजित्
पैत्यकोपमतिदारुणं जये
दग्नितप्तकविसर्पदोषजित् ।

---

[1]स्नेहयुतं–आ–क । [2]एष आ–ग्रन्थे नास्ति ।

अथ भोजनाधिकारः

ततो भोजनवेलायां [1]कृताचारः सदात्मवान्
देवान्पितॄन्समभ्यर्च्य कुर्यान्मङ्गलवीक्षणम् ।

लोकेऽस्मिन्मङ्गलान्यष्टौ ब्राह्मणो गौर्हुताशनः
हिरण्यं सर्पिरादित्य आपो राजा तथाष्टमः ।

एतानि सन्ततं पश्येन्नमस्येदर्चयेत्तथा
प्रदक्षिणं प्रकुर्वीत आयुर्वर्धनमुत्तमम् ।

अन्यत् :—

[2]हिरद्रा ... ... णं ... ... तथा
.... पुष्पं च मङ्गलाष्टकमुच्यते ।

अपरिहार्यद्रव्याणि :—

कुशशाकं पयो मत्स्याः गन्धपुष्पं दधि....
मांसशय्यासनं वासः प्रत्याख्येयं न वारि च
अन्यत्र कुलटाषण्ढपतितेभ्यस्तथा... ।

पत्नीविहितशृङ्गारं प्राप्य भोजन[3]मण्डपम्
यथा चाग्निबलं वीक्ष्य भोजनं [4]कारयेद्बुधः ।

[5]ओदनं प्राणिनां सद्यः बलकृद्देहधारिणाम्
स्मृत्यायुः पक्तिवत्तेजस्सत्वोत्साहविवर्धनम् ।

---

[1]सदाचारः । [2]हरिद्रा...पतितेभ्यस्तथा (३३७) एते आ–उ–ग्रन्थयोर्न सन्ति ।
[3]मन्दिरम्-आ । [4]कारयेन्नरः-उ ।
[5]ओदनं...क्षुधा (३६७) एते श्लोकाः आ ग्रन्थ एव ।

क्षुद्ग्लानिश्रमदाहघ्नं समस्तेन्द्रियबोधनम्
वृष्यं त्रिदोषजित्सौम्यं सर्वप्राणभृतां हितम् । ॥ ३४० ॥

निःस्नेहान्नगुणाः :—

करोति रूक्षं बलवर्णनाशनं
त्वग्रूक्षतां वातशकृन्निरोधम्
... ...
... ... ।

स्नेहान्नगुणाः :—

अतिस्निग्धं करोत्यन्नं विशेषाच्छ्लेष्मवर्धनम्
हृदि गौरवमालस्यं प्रसेकमरुचिं तथा ।

घृतपाकान्नगुणाः :—

ओदनस्य घृतं पथ्यं...पैत्यविकारजित्
चक्षुष्यं बृंहणं मेध्यं वृष्यं दीपनपाचनम् ।

तैलपाकान्नगुणाः :—

अन्नं सतैलं लघुकृत् बृंहणं वह्निदीपनम्
वातश्लेष्मप्रशमनं मेहविंशतिनाशनम् ।

क्षीरपाकान्नगुणाः :—

अन्नं क्षीरान्वितं हृद्यं क्षतक्षीणास्रपैत्यनुत्
बलशुक्रप्रदं नित्य वह्निनेत्रबलप्रदम् ।

दध्यन्नगुणाः :—

दध्यन्नं बृंहणं रुच्यं मेदोजाड्याग्निमान्द्यकृत्
उष्णपैत्यं कफक्लेदमहितं व्रणिनामपि ।

तक्रान्नगुणाः :—

तक्रौदनं तु सङ्ग्राहि ग्रहणीपाण्डुमेहजित्

शुष्कान्नगुणाः :—

अत्यन्तरूक्षं शुष्कान्नं बलवर्णप्रणाशनम् ।

अत्युष्णान्नगुणाः :—

अत्युष्णमन्नं मददाहतृष्णा बलप्रणाशं भ्रमरक्तपैत्यम् ।

पुराणान्नगुणाः :—

पुराण ओदनः शीतमधुरः पैत्यनाशनः
निद्रातन्द्राकरो रुच्यः गुरुः श्लेष्मविवर्धनः ।

घृतापोशनम् :—

वर्चोमूत्रविबन्धनुद्गरहरं वातापहं बृंहणं
बल्यं गुल्मगुदाङ्कुरप्रशमनं नेत्रामयनां हितम्
पैत्योन्मादविनाशनं रुचिकरं धातुप्रदं कान्तिदं
अन्नाज्जातमजीर्णरोगशमनं कर्षं घृतापोशनम् । ॥ २५० ॥

विरुद्धान्नम् :—

मिश्रं पथ्यमपथ्यञ्च भुक्तं समशनं मतम्
विद्यादध्यशनं भूयो भुक्तस्योपरि भोजनम् ।

अकाले बहु चाल्पं वा भुक्तं तु विषमाशनम्
त्रीण्यप्येतानि मतिमान् विरुद्धान्नं च वर्जयेत ।

भोजनं तृणकेशादिजुष्ट मुष्णीकृतं पुनः
शाकावरान्नभूयिष्ठमत्युष्णलवणं त्यजेत् ।

किलाटदधिकूर्चीकाक्षार शुक्तामम्लकम्
कृशशुष्कवराहाविगोमत्स्यमहिषामिषम् ।

माषनिष्पावशालूकाबिसपिष्टविरूढकम्
शुष्कशाकानि यवकान् फाणितं च न शीलयेत् ।

योग्याहारः :–

शीलयेच्छालिगोधूमयवषैष्टिकजाङ्गलम्
पथ्यामलकमृद्वीका पटोली मुद्गशर्कराः ।

घृतदिव्योदकक्षीर क्षौद्रदाडिमसैन्धवम्
त्रिफलां मधुसार्पिभ्यां निशि नेत्रबलाय च ।
स्वास्थ्यानुवृत्तच्च रोगोच्छेदकरं च यत् ।

अन्नदोषाः :–

अष्टावोदनदोषाः स्युः अस्रतः पिच्छिलाशुची
क्वथितः शुष्कितो दग्धो विरूपोऽमर्त्यजस्तथा
एभिर्दोषैर्युतस्त्याज्यः सर्वदोषकरो गुरुः ।

षड्रसगुणाः :–

मधुरं श्लेष्मलं प्रायो जीर्णाच्छालियवादृते
मुद्गाद्गोधूमतः क्षौद्रात्सितााया जाङ्गलामिषात् । ॥ ३६० ॥

प्रायोऽम्लं पित्तजननं दाडिमामलकादृते
अपथ्यं लवणं प्रायः चक्षुषोऽन्यत्र सैन्धवात् ।

तिक्तं कटु च भूयिष्ठमवृष्यं वातकोपनम्
ऋतेऽमृतापटोलीभ्यां शुण्ठीकृष्णारसोनतः ।

कषायं प्रायशश्शीतं स्तम्भनं चाभयामृते
रसाः कट्वम्ललवणाः वीर्येणोष्णा यथोत्तरम् ।

तिक्तः कषायो मधुरस्तद्वदेव च शीतलः
तिक्तः कटुः कषायश्च रूक्षा बद्धमलास्तथा ।

पट्वम्लमधुराः स्निग्धाः सृष्टविण्मूत्रमारुताः
पटोःकषायस्तस्माच्च मधुरः परमं गुरुः ।

लघुरम्लः कटुस्तस्मात्तस्मादपि च तिक्तकः
संयोगास्सप्तपञ्चाशत्कल्पना तु त्रिषष्टिधा ।

अन्नवर्जनगुणाः :–

शीघ्रं रूपविनाशनी कृशकरी कामोपविध्वंसिनी
ज्ञाने मन्दकरी तपःक्षयकरी धर्मस्य निर्मूलिनी

पुत्रभ्रातृकलत्रभेदनकरी लज्जाङ्कुरोद्भेदिनी
सा मां पीडति सर्वदोषशमनी प्राणापहारी क्षुधा ।

भोजनकालः :–

[1]विसृष्टे विण्मूत्रे हृदि सुविमले दोषे स्वपथगे
विशुद्धे चोद्गारे क्षुदुपगमने वातेऽनुसरति

तथाग्नावुद्रिक्ते विशदकरणे देहे च [2]विमले
प्रयुञ्जीताहारं विधि[3]नियमतः [4]कालसहितः ।

---

[1]विसृष्टे······दरिद्रस्य (३७१) एते उ–ग्रन्थे न ।
[2]सुलघौ इति आ पाठः । [3]नियमितः–आ ।
[4]कालस्स हि मतः-आ ।

भोक्तुकामश्च [1]धातुश्च(?) क्रोधवानपि गर्हितः
अन्नं विषसमं प्राहुरजीर्णे [2]प्राप्नयाद्ध्रुवम् ।

एक एव न भुञ्जीत [3]यदीच्छेत्प्रियमात्मनः
द्वित्रिभि[4]र्बहुभिः सार्धं [5]भोजनं कारये[6]न्नरः
अभीष्टफलसंसिद्धिस्तुष्टिः काम्यं सुसम्पदः । ॥ २७० ॥

[7]अशनमसाक्षिकफलं दुर्वृत्तस्य कृपणस्य वित्तमफलम्
यो न फलं दरिद्रस्य... ... ।

चकोरं मर्कटं कृष्णं शारिकाञ्च शुकं तथा
अमात्यराजपुत्राणां गृहेष्वेतानि [8]वर्धयेत् ।

चकोरं [9]चक्षुषोन्मीलं विष्ठां मुञ्चति [10]वानरः
शुकशार्यः प्रकूजन्ति दृष्ट्वान्नं विषसंयुतम् ।

तेषां दृष्टि[11]निपातेन ह्यन्नाद्यं निर्विषं भवेत्
पर[12]विद्याविनाशार्थं तेषां दर्शन [13]माचरेत् ।

[14]आदौ मधुरान्भुक्त्वा पश्चात्तिक्तकषायान्भुक्त्वा
अन्तेऽम्लं लवणं भुक्तं सम्यग्जर्णिं धातुपुष्टिकरम् ।

[15]आदौ मधुरमश्नीयान्मध्येऽम्ल[16]लवणं कटु
अन्ते तिक्तकषायौ च सम्यग्जीर्णं [17]सुखावहम् ।

---

[1]दाता च-क । [2]प्राप्नुयान्नरः–आ । [3]यदिच्छेत्–आ । [4]बन्धुभिः–आ ।
[5]भोजनेन प्रजायते–आ । [6]द्बुधः-क । [7]अशन...दरिद्रस्य–आ ग्रन्थे न ।
[8]रक्षयेत्–उ । [9]चक्षुषोर्नैल्यम्–उ ।
[10]मर्कटः–उ । [11]निपाताद्वैरन्नाद्यं-उ ।
[12]निन्दा–उ । [13]मुच्यते–आ ।
[14]एष श्लोकः आ–उ–ग्रन्थयोर्नास्ति । [15]एष–आ–उ क-ग्रन्थेष्वेव ।
[16]लवणो रसौ–उ–क । [17]रसायनम्-क ।

[1]अत्याहारद्भवे दुग्लानिर[3]ल्पाहारे बलक्षयः
[4]तेनाहारबलं सम्यगायुर्वर्धनमुत्तमम् ।

तृष्णार्तस्तु न भुञ्जीत क्षुधार्तो न पिबेज्जलम्
तृष्णार्तो जायते गुल्मी क्षुधार्तस्तु भगन्दरी ।

[5]भुक्त्वान्ते मथितं सम्यक्कराभ्यां च विशेषतः
तत्तोयं नेत्रयोः क्षिप्त्वा नेत्ररोगं जयेन्नरः ।

भुक्त्वोपविशतस्तुन्दः भुक्त्वा [6]सञ्चर(प्रविचर)न्सुखी
[7]आयुश्चक्रप्रमाणेन मृत्युर्धावति धावतः । ॥ ३८० ॥

अम्बुपानविधिः :–

[8]अभुक्तपानं खलु दोषदायी
भुक्तान्तरे चामृततुल्यपानम्
आरोग्यकृद्भुक्तवतान्तपानं
शनैः शनैरल्पजलं पिबेच्च ।

[9]भोजनादौ पिबेत्तोयमग्निसादं कृशाङ्गताम्
मध्ये [10]चाग्निं विवर्धेत अन्ते श्रेष्ठं [11]रसायनम् ।

1अत्याहारा...भगन्दरी–उ ग्रन्थे न स्तः ।
2द्व्याधिः-आ । 3रनाहारात्–आ । निराहारात्–क ।
4समाहाराद्बलं–आ । 5भुक्त्वा तु–उ ।
6संधिशतः सुखम्–आ–क, संविशदं सुखम्–उ ।
7आयुष्यं चरमाणस्य–आ । आयुश्च क्रममाणस्य–क ।
8एष श्लोकः आ–ग्रन्थे नास्ति ।
9भोजनादौ ..म्बुपाः (३८३) आ–उ–क–ग्रन्थेष्वेव ।
10तोयं भवेत्पथ्यम्–उ, कामं पिबेत्–क । 11सुखावहम्–क ।

समस्थूलकृशाः भुक्तमध्यान्तप्रथमाम्बुपाः
[1]पिबेद्‌घटसहस्राणि यावदस्तंगते रवौ ।

निशि भोजनवेलायां स्वल्पमप्युदकं विषम् ।

[2]अन्नेन कुक्षेर्द्वावंशौ पानेनैकं प्रपूरयेत्
आश्रयं पवनादीनां चतुर्थमवशेषयेत् ।

[3]आमं विदग्धं [4]विष्टम्भि रसशेषं तथैव च
चतुर्विधमजीर्णं तु तक्रं तत्र परिक्रिया ।

गुरुणामर्धसौहित्यं लघूनां नातितृप्तता
मात्राप्रमाणं निर्दिष्टं सुखं यावद्धि जीर्यते ।

अत्यम्बुपानान्न विपच्यतेऽन्न–
मनम्बुपानाच्च स एव दोषः
तस्मान्नरो वह्निविवर्धनाय
मुहुर्मुहुर्वारि पिबेदभूरि ।

[5]आहुते प्रातराशे च सायमाशोऽमृतायते
आहुते सायमाशे तु प्रातराशो विषायते ।

अतिमधुरमनलशमन[6]मसौख्यं न पुष्टयेद्वपुषः
अतिलवणमचक्षुष्यं [7]तीक्ष्णोत्यम्लं जरा साक्षात् । ॥ ३९० ॥

[8]शाकेषु तरुणं पथ्यं तथा पर्युषितं हितम्
संवत्सरोषितं धान्यं सद्यो···हितम् ।

1एष आ–ग्रन्थ एव । 2अन्नेन···परिक्रियां–आ, उ–ग्रन्थयोरेव ।
3अन्नं–उ । 4विष्टब्धं–उ । 5एष आ ग्रन्थे नास्ति ।
6भुक्तमसात्म्यं–आ । 7अतितीक्ष्णाम्लं रसात्साक्षात्–आ ।
8शाकेषु...जन्तवः (३९४) एते आ ग्रन्थे न ।

अपर्युषितपानीयं सपर्युषितभोदनम्
.... क्षीरशुष्कं दधि ।

अन्नादष्टगुणं पिष्टं पिष्टादष्टगुणं पयः
पयसोऽष्टगुणं माषं माषादष्टगुणं घृतम् ।

.... यद्भुक्तं पुष्यमाघयोः
यो ज्येष्ठाषाढयोर्ळुप्तं तेन जीवन्ति जन्तवः ।

[1]मार्गशीर्षान्तिकपक्षौ पुष्यमासस्य चादिमौ
तावुभौ यमदंष्ट्राख्यौ . . . . तत्र जीवति ।

[2].... .... शुण्ठी .... क्षौद्रयुतश्च तैलम्
सर्वाणि शाकानि च तिक्तकानि रात्रौ ।

विदाह्यमन्नं आयुःक्षीणं क्षीणबलं च करोति
. . . . दिवारात्रौ नवम्यां च तथैव च
धात्रीफलं प्रयत्नेन ... ... वर्जयेत् ।

आमलक्याः फलं चैव जम्बीरं तिन्त्रिणीफलम्
आयुर्हानिर्यशोहानिः प्रज्ञाहानिस्तथैव च
य रो रात्रौ सदा धात्रीं विसर्जयेत् ।

आपोशनं च घृतं च सलिलं पयः
पानकाले . . . . . समं स्मृतम् ।

---

[1]कार्तिक्यामपरः पक्षो मार्गशीर्षस्य चादिमः । द्वावेतौ यमदंष्ट्राख्यौ मिताहारस्स जीवति –आ ।
[2]शुण्ठी...निद्रया (४१२) आ ग्रन्थे न ।

आपोशनं करे धृत्वा पुनः पूरयते यदि
श्वानविष्ठसमं चान्नं श्वानमूत्रसमं जलम् । ॥ ४०० ॥

पानीयं…भक्ष्यं घृतं लवणमेव च
लेह्यं पेयं च विविधं व्यञ्जनं तैलमेव च
ह…दत्तं न भुञ्जीत तुल्यं गोमांसभक्षणम् ।

दर्व्या देयं घृतं चान्नं लवणं व्यञ्जनानि च
. . . . . स्नेहपक्वं च न तु दर्व्या कदाचन ।

हस्ताद्देयं तु यो … दुर्व्यादेयं तु हस्तयोः
सद्यो ब्राह्मण …. …. …. मूत्ररेतसि ।

नारिकेलोदकं कांस्ये ताम्रपात्रस्थितं मधु
ताम्रपात्रस्थितं गव्यं मद्यतुल्यं घृतं विना ।

हैयङ्गवीनं गोक्षीरं पिण्याकं दधिसक्तवः
स्नेहपक्वं च तक्रं च शूद्रा (नीतेन) दुष्यति ।

यथेष्टं भुङ्क्ष्व मा भैषीः तक्रं सलवणं पिब
तस्योपरि च पानीयं… … … ।

भुक्त्वा वह्नि….गत्वा शतपदं शनैः
शयीत वाम भागेन किं वैद्येन प्रयोजनम् ।

वातपिः भक्षितो येन … महोदधिः
यस्य … तदगस्त्यो जयिष्यति ।

अगस्त्यं कुम्भकर्णं च शमीं च बडबानलम्
आहारपरिणामार्थं स्मरामि च वृकोदरम् ।

भोजनस्था . . . .

. . . . स्वर्गे लोकद्वारमार्गे . . . . । ॥ ४१० ॥

. . . . भित्तिगन्धौ लक्ष्मीकामो वर्जयेदन्नभुक्तम्

प्रातर्मूत्रपुरीषाभ्यां मध्याह्ने क्षुत्पिपासयोः ।

तृप्तो कामो न बाध्यन्ते . . . निद्रया

[1]आहारकाले सम्प्राप्ते यो न भुङ्क्ते बुभुक्षितः ।

तस्य नश्यति कायाग्निः निरिन्धन इवानलः ।

वामपार्श्वस्थितं पैत्यं पैत्यादग्निः प्रजायते

तस्माद्वामेन शायीत भुक्तमाशु सुजीर्यति ।

वामभागस्य शयने द्वात्रिंशच्छ्वासानिर्गमः

दक्षिणे भागशयने निःश्वासाः पञ्चविंशतिः ।

अतः परं दशश्वासा निद्राकालं वहेद्बुधः

भैषज्यतो यत्पुरुषः स्वप्नाद्दक्षिणपार्श्वतः ।

भोज्यादिरितरद्रव्यान् तेन तृप्तोऽ हि हन्ति तान् ।

आहारं पचति शिखी देहं पचते निराहारः

देहक्षये च धातून् धातुक्षयतो हरेत्प्राणान् ।

भुक्त्वा राजवदासीत यावदन्नं प्रतिष्ठितम्

भुक्त्वा शतमरुद्भूयः शतमात्रं ततः परम्

उत्थाय तिष्ठेद्गच्छेच्च पादानां तु शतं समम् ।

1आहारकाले...निशि-(४३२) एते आ ग्रन्थ एव ।

धातुपरिणामः :–

भुक्ताहारो द्वितीयेऽह्नि रसत्वमुपगच्छति
शोणितन्तु तृतीयऽन्हि चतुर्थे मांसतामपि । || ४२० ||

मेदस्त्वं पञ्चमे षष्ठेऽस्थित्वं सप्तमे व्रजेत्
मज्जात्वं शुक्रत्वं याति दिवसे चाष्टमे नृणाम् ।

दिवा भुक्तमजीर्णञ्च रात्रौ भुक्तेन जीर्यति
रात्रिभुक्तमजीर्णञ्च दिवास्वापेन जीर्यति ।

अर्कोदये तु हृदयं बुद्ध्यते कमलं यथा
तस्मात्स्रोतांसि सर्वाणि विवृतानि भवन्ति च ।

इन्द्रियाणां विकासाच्च व्यायामाच्च विशेषतः
तस्माद्रात्रौ हि भुञ्जीत न कुर्यात्तान्निषेधनम् ।

घृततैलञ्च पानीयं कषायं व्यञ्जनादिकम्
पक्वं हितं पुनः पक्वं विषवध्दन्ति मानवम् ।

रात्रौ शृतं दिवि जलं गुणतामधिगच्छति
पानीयं न तु पानीयं पानीयेऽन्यप्रदेशजे ।

अजीर्णे क्वथितञ्चामे पक्वे जीर्णेऽपि नेतरत्
शीते विधिरयं तप्ते त्वजीर्णे शिशिरं त्यजेत् ।

अतियोगेन सलिलं तृष्यतोऽपि प्रयोजितम्
प्रयाति श्लेष्मपैत्यत्वं ज्वरितस्य विशेषतः ।

यामान्तरे भोजनरोगकारी यामद्वये भोजनरोगहारी
यामत्रये भोजन शोषकारी यामेऽन्तिमे भोजननष्टकारी ।

नाभिस्थानादङ्गुले वामपार्श्वे तिष्ठत्यग्निः व्रीहिमात्रप्रमाणः
ते चत्वारस्तीक्ष्णमन्दौ विषाग्निः सौम्याग्निश्चेत्यन्नपानं पिबेयुः ।
॥ ४३० ॥

क्रिमिभिर्भक्ष्यते पादं पादमग्नौ विपच्यते
पादं किट्टत्वमाप्नोति पादमङ्गे विसर्पति ।

भिनत्ति कफसङ्घातं हिनस्ति च मरुद्गणान्
अजीर्तिं हरति क्षिप्रं पीतमुष्णोदकं निशि ।

अथ पात्रविशेषगुणाः

स्वर्णपात्रम् :–

[1]पात्रे स्वर्णमये मनोमलहरं [2]राजाधिराजा[3]श्रय-
[4]स्थानं जाठरपावकस्य जननं पथ्यं परं बृंहणम्
[5]नित्यं भोजनमङ्ग मङ्गलकरं सौख्यप्रदं पावनं
[6]चित्तक्षोभनिवारणं परिहरेन्मित्रं कृशानोरपि ।

रौप्यपात्रम् :–

रौप्यपात्रे भोजनं [7]पित्तकासं श्लेष्माटोपं वारयेद्वातकारि
शुद्धं हृद्यं रेचनं कान्तिदायि श्रेयस्कामैः सर्वदा सेवनीयम् ।

कांस्यपात्रम् :–

भोजनं जयति [8]कांस्यसुपात्रे रक्त[9]पित्तपारिसर्पणमाशु

1पात्रं स्वर्णमयं–आ । 2पानीयदोषापहृत्–क–पाठः ।
3प्रियं–आ । 4तृष्णादाहविनाशनाय जनितं श्रेयस्करं श्रीकरं–क ।
5कान्ति सन्तनुते विशिष्टमतिभिः संसेव्यते सर्वदा । पित्तस्योन्नतिनाशनं श्रमहरं पुष्टिप्रदं कान्तिकृत् ।–क । 6पैत्यक्षोभ–आ । 7पैत्यकोपं–आ–क ।
8कांस्यक–आ–क । 9पैत्य–आ ।

हृद्य[1]माहू [2]रुचिदं रुचिकारि क्षोभणं जयति नेत्रगदानाम् ।

ताम्रपात्रम् :–

[3]ताम्रे पात्रे भोजनं कान्तिकारि पुण्यं मेध्यं नेत्ररोगांनिहान्ति

पाठान्तरे :–

पुण्यं पवित्रमारोग्यं ताम्रपात्रस्थभोजनम्
रक्तदोषहरं वर्ण्यं नेत्राणां परमं हितम् ।

कान्तपात्रम् :–

कान्ते पात्रे भोजनं छर्दिहारि वर्ण्यं नेत्र्यं शोफपाण्डुं निहान्ति ।

त्रपुर्लोहादिपात्राणि :–

त्रपुर्लोहादिपात्रस्थं भोजनं न प्रशस्यते
अहृद्यं कार्श्यजनकं प्रमेहहरणं परम् ।

आयसपात्रम् :–

आहारमरुचिं कुर्यादायसे भोजने स्थिता
निहान्ति कामलापाण्डुच्छर्दिशोफांश्च कान्तिकृत् ।

काचपात्रम् :–

···भोजनगतं रुचिरान्न···मारुतवेगम्
······जठराग्ने···नेत्र्यं···कमनीयम् । ॥ ४४० ॥

कदलीपत्रम् :–

अतिशुचि लघु भुक्तं पत्रपात्रे कदल्याः
कफपवनहरं स्याद्बल्यमारोग्यकारि

---

[1]माशु–आ । [2]शुचिदं–आ ।
[3]ताम्रे...कमनीयम् (४४०) एते आ–ग्रन्थे न ।

जनयति तनुकान्तिं कामिनीसङ्गमेच्छा–
　　मशनमनलदीप्तिं पित्तशान्तिं च जन्तोः ।

पालाशपात्रम् :–

पलाशपत्रो[1]दनसेवनेन
　　पलायनं गुल्म[2]महोदराणाम्
[3]न श्लेष्म[4]शूलानि समाहृतानि
　　सद्यो [5]भजन्ते परिहृत्य पैत्यम् ।

वटपद्मपत्रे :–

[6]पैत्यघ्नश्च व्रणघ्नश्च वटपत्रे तु भोजनम्
गरहारी च तत्प्रोक्तं पद्मपत्रे तु भोजनम् ।

पनसपत्रम् :–

[7]पनसदलगतान्नप्राशनं पैत्यदायि
　　प्रबलपवनवेगं वारयेद्वह्निकारि

वितरति....पैत्यं सर्वदा सेव्यमानं
　　परिहरति कफोत्थव्याधिमत्यन्तघोरम् ।

पुष्करपात्रम् :–

पुष्करच्छदनभोजनं नृणां रूक्षमाहु .... कारणम्
... ... दरसन्ततेः वारणं भवति मन्दिरं श्रियः ।

---

[1]पत्रोदर–आ–पाठः ।　[2]मरुन्मुखानि–आ; विमोहनानाम्–क–पाठः ।
[3]सश्लेष्म–आ–क ।　[4]वातानि–क ।　[5]जयन्त्येव परास्तपित्तम्–क ।
[6]एष आ–ग्रन्थ एव ।
[7]पनसदल...श्रीनिवारणम् (ताम्बूलाधिकारात्पूर्वं) एते आ ग्रन्थे न ।

कुटजपत्रम् :–

कुटजगतान्नप्राशनं दीपनीयं वितरति मलवृद्धिं कुष्ठरोगापहारि
गुदगलगतशान्तिं पैत्यकोपं च कुर्या-
त्कृमिहरमपि वातध्वंसि....स्यात् ।

अर्कपत्रम् :–

अर्कस्य पत्रोदरसेवनेन नश्यन्ति पीनसमपि कृमयस्समस्ताः
शोफोऽपि सर्वाङ्गविजृम्भमाणः प्र•••सद्यो विविधां विपत्तिम् ।

पाणिपत्रम् :–

पाणिपात्राशनं सर्वं योगिनामेव शस्यते
मनोमलहरं रुच्यं सर्वक्लेशनिवारणम् ।

एरण्डपत्रम् :–

वातघ्नपत्रान्तरसंस्थितान्नं निषेवितं पैत्यविकारकारि
विजृम्भणं . . . . णस्य कफोदयमस्य वश्यम् ।
विपुलयुग्मदलेन च भोजनं जयति मारुतवेगविजृम्भणम्
कफगदान्यपि च दुस्तरान्यहो जाठरानलविवर्धनकारिणी ॥ ४५० ॥
•••स्थिता संस्थित भक्तभुक्तं रुचिप्रदं वा....न्ति
निहन्ति पित्तस्य विजृम्भणं च समस्तमुक्तं द्विजपुङ्गवानाम् ।

भूपात्रम् :–

वसुन्धराशुद्धतलासुसेवितं करोति पित्तं कमलाग्रजायान्
पैत्यामयानां कफवृद्धिकारि कफं निहन्या . . . वा प्रशस्तम् ।

चूतपत्रम् :–

चूतपत्राशनं भुक्तं सुखसौभाग्यवर्धनम्
समस्तदोषहरणं पित्तनाशनकारणम् ।

तालपत्रम् :–

तालपत्रस्थितं भुक्तं भोजनं सौख्यकारणम्

नारिकेलम् :–

अनेकदोषहरणं नारिकेलफलं तथा ।

केतकीपत्रम् :–

केतकीदलगतान्नभोजनं मूत्रकृच्छ्रविनिवारणं ततः
शीतलं क्षतजपैत्यनाशनं दाहमेहशमनाय निर्मितम् । ॥ ४५० ॥

वेणुपात्रम् :–

वेणुत्वचा निर्मितपात्रभुक्तं निवारयेद्वातविजृम्भणानि
पित्तं विदग्धदमृतप्रतापं तथैव सेव्यं धरणीसु . . . ।

पूगस्य प्रसवप्रधान . . . त्वग्भोजनं पात्रनं
वर्ण्यं वायुसखस्य दीप्तिजननं नेत्रोत्सवोत्पादनम्
पित्तघ्नं पवनप्रकोपशमनं सर्वाङ्गवातापहं
तत्पात्रन्तु वितन्तुसर्वरमणीतन्तूद्भमापादनम् ।

क्षीरिवृक्षपात्रम् :–

पञ्चानां क्षीरिवृक्षाणां पात्रभोजनमुत्तमम्

अश्वत्थपात्रम् :–

अश्वत्थपात्रपत्रस्थभोजनं वातकारणम् ।

अलाबुपात्रम् :–

अलाबुफलपात्रस्थभोजनं वातकारणम्
दारिद्र्य. . . . . .विप्राणां न प्रशस्यते ।

···पालाशनं निन्द्यं द्विजादीनां न शस्यते
करोद्भूतं कारिभयं कौमं तत्पत्रकीर्तितम् ।

वस्त्रान्नम् :–

वसनपरिगतान्नप्राशनं न प्रशस्तं
तनुतरमजयूकत्वात···पात्रम्
विविधमलयुतत्वच्छित्त वैकल्यकारि
....च पवमाननी च मर्त्यैर्निषेव्यम् ।

दारुमृण्मयाशिलापात्राणि :–

शुध्ददारुमये पात्रे रुचिकृत्स्थौल्यकारणम्
मृण्मयेऽथ शिलापात्रे भोजनं श्रीनिवारणम् ।

अथ ताम्बूलाधिकार :

क्रमुकभेदलक्षणम् :–

पूगं सुदेशसम्भूतं कठिनं गुरु चिक्कणम्
शशमांससमं भिन्नं क्रमुकं तु सुशोभनम् ।

क्रमुकः :–

[1]उद्रिक्तपित्तं परिदाहयुक्तं फलं त्रिहन्यात्क्रमुकद्रुमस्य
विरेकभङ्गे लघुतां कृशानोः कोष्ठस्थितस्यापि तनोति वृद्धिम् ।

सुक्षेत्रक्रमुकं क्रमाद्विनिहरेद्वातं च पित्तं कफं
तत्कालश्च निषेवितं सुमृदुलं हैयङ्गवीनं यथा
राजन्यैः सुकुमारकै···संसेव्यमानं मुदा
कान्ति कामपि सन्तनोति वपुषः पुष्टिश्च तुष्टिं तथा । ॥ ४६० ॥

1उद्रिक्तपित्तं···सरञ्च (४६१) एते आ–उ–पाठयोर्न ।

चिक्कणं तनुभृतां रसायनं .... कृशानुवर्धनम्
रोचनं निखिल धातुपोषणं श्रीकरं रसनयाभिवाञ्छितम् ।

पूगफलं नरारातिभिदं वन्यं कुर्यात्क्रुधश्लेष्मलं
. . . सैव भवेद्विरेचनकरं मोहं मुहुः प्रेरयेत्

पाषाणप्रतिमं . . . विंदलितं नेन्द्रादिभिः शक्यते
वातस्योन्नतिमातनोति पशुभिस्तुल्यैर्नरैः सेव्यते ।

पाठान्तरे :–

पूगं कषायमधुरं रूक्षं दोषत्र[1]यापहम्
सुपक्कं तु त्रिदोषघ्नमपक्कं [2]दोषदं भवेत् ।

[3]पूगीफलं पैत्यहरं प्रमानं विरेचनीयं लघुदीपनीयम्
ईशश्च माधुर्यरसेन युक्तं जाड्यापहं वस्तिविशोधनञ्च ।

[4]चन्द्रापुरोद्भवं पूगं कफघ्नं . . . शोधनम्
पश्चिमा . . . देशश्च ऋमुकं पत्रमेव च ।

कफमारुतकोपश्च मन्दाग्निक्रिमिवर्धनम् ।

द्रविडपूगः :–

द्राविडोद्भवपूगानि रूप्याणि मधुराणि च
किञ्चिद्वातप्रकोपानि पत्रं तद्गुणमादिशेत् ।

1हरं परं–उ । पापहं परम्–क । 2मपक्वं तु निदोषलम्–उ ।
3पूगीफलं...प्रशस्तं (४८४) उ पाठे न ।
4चन्द्रा...बन्धनात् (४७७) आ पाठे न ।

. . . .

....कटुकषायोष्णा काठिना रुचिकारिणी
मलविष्टम्भशमनी पित्तकृद्दीपनी च सा ।

आर्द्रपूगः :–

आर्द्रं पूगं कषायं . . . मलशमनं कण्ठशुद्धिं विधत्ते
रक्तामश्लेष्मपुष्पप्रशमन मुदराध्मानहारं सरञ्च

शुष्कपूगम् :–

शुष्कं पूगं कषायं रुचिकर मुदितं पाचनं रोचनं स्यात्
तत्पर्णं स्नायुकं झडिति वितनुते पाण्डु वातञ्च शोफम् ।

नागवल्लीनामानि :–

अथ भवति नागवल्ली ताम्बूली फणिलता च सप्तशिरा
पर्णलता फणिवल्ली भुजङ्गलता च भक्षपत्रि च । || ४७० ||

सामान्यपत्रगुणाः :–

ताम्बूलवल्लीछदनं सतिक्तं कफस्य कार्श्यं नितरां तनोति
संसेव्यमानं वदनस्य शुध्दिः क्षारान्वितं पाचनदीपनञ्च।

क्षारं रोचनमग्निदीपनकरं सौभाग्यसम्पत्करं
वर्ण्यं शूलनिबर्हणं वदन . . . नशेषान् जयेत्
पथ्यं प्राणभृतां परं फणिलतापर्णं सतिक्तं कफं
वातञ्च प्र . . . पुष्टिजनकं भूपैस्सदा भुज्यते ।

सद्यः . . . भक्षितं मुखरुजाजाड्यादिदोषप्रणुत्
दाहारोचकरक्त . . . . विष्टम्भिकान्तिप्रदम् ।

वराहकर्णप्रतिमानियानि शस्तानि कायाग्नि विवर्धनानि
ताम्बूलपत्राणि मनोहराणि....रोगा.......वदन्ति ।

श्रीपादी मधुरा तीक्ष्णा वातपित्तकफापहा
रसाढ्या मधुरा रुच्या विपाके मधुरा सरा ।

कृष्णं वर्णं तिक्तमुष्णं कषायं धत्ते जाड्यं वक्त्रजाड्यं मलं च
शुभ्रवर्णं श्लेष्मवातामयघ्नं पथ्यं रुच्यं दीपनं पाचनं च ।

क्षीरवर्णं च शैथिल्यं...च कुरुते गदान्
अरोचकप्रतिश्यायमुखरोगाक्षिबन्धनान् ।

भक्षणं चूर्णपर्णस्य [1]लक्ष्मी हानिर्विवर्धनम् ।

मतान्तरम् :—

पर्णाग्रं पर्ण[2]पृष्ठं च चूर्णपर्णं द्विपर्णकम्
शीर्णपर्णं जरत्पर्णं वर्जयेद्बुद्धिमान्नरः ।

...[3]मधुरा तीक्ष्णा कटुरुष्णा च पाचनी
गुल्मोदरहराध्मानं नाशयेद्रुचि...... । ॥ ४८० ॥

स्यादाम्लपूरा कटुकाम्लतिक्ता कटूष्णा मुखपाककर्त्री
विदाहपित्तास्रविनाशिनी च विष्टम्भदा वातनिबर्हिणी च ।

कर्पूरवल्ली जनयेत्प्रमोदं...मधुरा लघु
अक्षि ... ... घ्नो रोचनस्सदा ।

मतान्तरम् :—

सक्षारं कटुदीपनं रुचिकरं सौभाग्यसम्पत्करं

---

[1]लक्ष्मी सौभाग्यनाशनम्—आ । [2]मूलञ्च—आ ।
[3]मधुरा...प्रशस्तम् (४८४) आ पाठे न ।

वर्ण्यं प्रीतिविवर्धनं लघुहरं वक्त्रामयध्वंसनम्
कामोद्दीपं........गन्धविशदा कर्पूरवल्ली....
....कफापहं सुकृतिभिर्भूपैस्सदा सेव्यते ।

पत्रलक्षणम् :

ताम्बूलवल्लीदलनञ्च सान्द्रं सु....न्वितञ्च
तदा स्वपत्न्याः करपल्लवेन सुरक्षितं सौम्य....प्रशस्तम् ।

ताम्बूललक्षणम् :

कटुकं रससंयुक्तं [1]नागवल्लीसुशोभनम्
सुपक्वदलसंयुक्तं सर्वदोषविवर्जितम् ।

कफवातहरं भेदि नागपत्रं प्रकीर्तितम्
दीपनं क्रिमिदोषघ्नं विशदं निर्मलं लघु ।

ताम्बूलदानलक्षणम् :

[2]ताम्बूलं तु गुरोः दद्याद्द्वात्रिंशत्पर्ण ...
सतां द्वादशपर्णानि षट्पर्णानि च वैरिणाम् ।

द्वादशाष्टौ च नारीणां जामातॄणां दशाष्टकम्
पञ्चत्रीणि च पर्णानि न देयानि कदाचन ।

---

[1]पत्रं तु शोभनम्—आ । पत्रं सुशोभनम् उ—क ।
[2]ताम्बूलं...कदाचन एतौ आ—पाठे न स्तः ! ताम्बूलं...जठरामयघ्नम् (४९२) उ पाठे न ।

पाठान्तरे :

चूर्णं [1]चार्जुनवृक्षजं कफहरं गुल्मघ्नमर्काह्वयं
[2]शोफघ्नं [3]कुटजं करञ्जजनितं [4]वातापहं रुच्यदम्
[5]पित्तघ्नं जलजं बलाग्निरुचिदं शैलाह्वयं पित्तदं
[6]स्वा . . . . दृढदन्त . . . . . . रूक्षणम् ।

ग्रन्थान्तरे :—

[7]शुक्तिप्रभूतञ्च शिलासमुत्थं शम्बूकजं शङ्खजमौक्तिकञ्च
एतानि चूर्णानि मनोहराणि विचक्षणैः... वदन्ति । ॥ ४९० ॥

अथ चूर्णभेदाः

शुक्तिजम् :

शुक्तिजं च लघुशूलवातनुद्दीपनं रुचिकरं कफहारि
शङ्खचूर्णममलं क्रिमिप्रणुत् दीपनं क्रिमिसमीरणापहम् ।
मेहशोफहरणं शरीरिणां स्तोकलावणरसान्वितं लघु
मुक्ताफलोत्थं कफपित्तहारि समीरकारि जठरामयघ्नम् ।

मतान्तरे :

[8]चूर्णं पाषाणसम्भूतं त्रिदोषशमनं लघु
वातपित्तहरं शाङ्खं [9]शुक्तिजं [10]वातपित्तनुत्

---

[1]चार्जुनसम्भवम्–आ । [2]शूलघ्नं–आ । [3]कफदं–आ ।
[4]वातामयं (?) आ । [5]रुच्यं स्वादुपरं कषायतिरहं–आ ।
[6]साधिक्यं प्रवदन्ति कान्तिजननं शुक्तादिजं दीपनम्–आ ।
[7]शुक्तिप्रभूतञ्च···जठरामयघ्नम् (४९२) आ–पाठे न । [8]सुधा–उ ।
[9]हितदं भवेत्–आ; [10]शीतलं भवेत्–उः । निर्मलं भवेत्–कः ।

शम्बूकं श्लेष्मरोगघ्नं मुक्ताचूर्णन्तु [1]वातलम् ।

[2]कनिष्ठिका ब्रह्महत्या मध्यमा गुरुतल्पका
तर्जनी चूर्णलेपेन तुल्यं गोमांसभक्षणम् ।

[3]अनिधाय मुखे चूर्णं...खादयते नरः
मतिभ्रंशो दरिद्रस्य दन्तेन स्मर्यते हरेः ।

ताम्बूलभक्षणप्रकारः

मुखान्तराले न निधाय पर्णं यः कोऽपि खादेत्फलपत्रचूर्णम्
[4]भुक्त्वा दरिद्रः खलु सप्तजन्मा[5]नानुस्मरेद्विष्णु[6]मतोऽन्यकाले ।

मतान्तरे :

ताम्बूलसेवां विधि[7]वद्विधिज्ञः [8]कुर्यात्प्रभातादिषु
सप्तसंख्या भुक्तोत्तरे पञ्चपडेवमूर्ध्वे विंशत्रिंशो वा नितरां निशासु ।

अन्यत् :

[9]पूर्वाह्णे लेपनं च षट्सद्यो भुक्त्वा च चतुराणि च रात्रौ
द्वित्रीणि च प्राहुर्नित्यं ताम्बूलचर्वणम् ।

ताम्बूलपरिमाणम् :

पूगस्यार्धपलं फलं [10]त्रिदलितं चूर्णं [11]द्विशोणां समं
शङ्खस्यामलमौक्तिकस्य यदि वा शुक्तेस्तथैवात्मनः

1वातनुत्–आ ।   2कनिष्ठिका...भक्षणम् एष आ–पाठे न ।
3अनिधाय मुखे पर्णं यः खादेत्पूगीफलं नरः । दरिद्रत्वमवाप्नोति शक्रतुल्योऽपि मानवः–आ ।   4भूत्वा–क पाठः ।   5न संस्मरेत्–आ-क ।
6मथान्तकाले–उ–न्त्य–क पाठः ।   7विधिवद्विदद्य त् उ ।
8भक्तात्पुरस्तादिह सप्तवारं, भक्त्वोर्ध्वंशः पञ्चश एव मर्त्यो द्विशस्त्रिशो वा नितरां निशासु । आ–क ।   9पूर्वाह्णे...चर्वणम् आ ।
10द्विदलितं-आ–क ।   11द्विशाणार्णवम्–क ।

[1]साध्या सार्धपलैः किटिश्रुतिसैमस्ताम्बूलवल्लीदलै-
स्ताम्बूलं विधिना[2]तथैवममृतं नो[3]चेद्भवेदन्यथा ।

[4] एकपूगं चतुःपर्णं सुधामात्रं यथाक्रमम्
एकपूगं [5]चतुःपर्णं चूर्णं निष्पावमात्रकम् । ॥ ५०० ॥

कर्पूरं तु तदर्धं स्यात्तक्कोलं त्रिचतुष्टयम्
लवङ्गकुसुमं [6]तद्वदर्धं ... ... फलम्
क्रमेण भक्षये[7]द्धीमान् ताम्बूलं सर्वदोषजित् ।

क्रमुकपर्णचूर्णदोषाः :

पूगान्तर्गतकीटस्तु गलगण्डगदावहः
पर्णान्तर्गतकीटस्तु मुख[8]रोगान्करोति च ।
[9]सचूर्णसूक्ष्मपाषाणसेवितञ्चाश्मरीं [10]जयेत्
तस्मात्पर्णविशुद्धिश्च कुर्यात्ताम्बूल[11]लक्षणम् ।

ताम्बूललक्षणम् :

[12]ताम्बूलवल्ली रुचिरा .... ।
दलानि पूगस्य फलानि सन्ति क्षारेण शुक्तिमिलितं समस्तम्
ताम्बूलमित्येतदुदाहरन्ति ।

ताम्बूलगुणाः :

ताम्बूलं कटुतिक्तमुष्णमधुरं क्षारं कषायान्वितं
वातघ्नं क्रिमिनाशनं कफहरं कायाग्निसन्दीपनम्

1साधं–आ–उ–क । 2तदेतदमृतं–क । 3चेदतस्त्वन्यथा–क ।
4एकपूगं...दाहरन्ति (५०५) एते–उ–पाठे न । 5पञ्च–अ ।
6तद्वल्लेपार्थं जातिकाफलम्–आ । 7येद्विद्वान्–आ ।
8रोगकरः परम्–आ । 9चूर्णं तु सूक्ष्म–आ । 10सृजेत्–आ ।
11चर्वणे–आ । 12एष आ–पाठे न ।

स्त्रीसम्भाषणभूषणं रुचिकरं शोकस्य विच्छेदनं
ताम्बूले विहितास्त्रयोदशगुणाः स्वर्गेऽपि ते दुर्लभाः ।

अन्यत्र–ग्रन्थान्तरे :–

[1]ताम्बूलं कटुकं कफानिलहरं रुच्यं परं दीपनं
कासश्वासविबन्धगुल्मगुदकीलाध्मानगुल्मापहम्
दुःखध्वंसि सुखप्रदायि रुचिकृत्स्त्रीणां महामोहनं
हृद्यं कण्ठगदापहं मदकरं कल्कं विषस्योपमम् ।

किञ्च :–

सुखं दिव्यं तिक्तं कटुकसहितं भौममममृतं
कफघ्नं ताम्बूलं रतिकरमसह्यार्तिहरणम्
कषायं स्वादूष्णं युवतिजनसंभाषणविधौ
[2]मनोज्ञं नेपथ्ये क्रिमिपवनजिद्दीपनकरम् ।

सङ्ग्रहे :–

[3]कासश्वासविबन्धाध्मानोदरगुल्मशूल
गुदकीलान् कण्ठामयांश्च सर्वान्

ताम्बूलं हरति शोधयेच्च मलान्
पैत्यं विजह्याद... तथैव ताम्बूल
तत्रैव विषं वदन्ति ।

1आ–उ–पाठयोर्नास्ति श्लोकोऽयम् । 2प्रधानम्–उ ।
3एष आ–पाठे नास्ति । कास ..पलाशै.–एते उ–पाठे न

ताम्बूलदानम् :–

सभा[1]प्रवेशेऽध्ययने विवाहे क्रतौ च युद्धे [2]शयने प्रयाणे
ग्रामप्रतिष्ठा[3]द्विजदेवकार्ये ताम्बूलदानं [4]परमं वदन्ति । ॥ ५१० ॥

[5]पत्रं विष्णुः फलं ब्रह्म चूर्णन्तु भगवाञ्छिवः
त्रीण्येतानि समायुक्तं ताम्बूलं दानमुत्तमम् ।

आयुरग्रे यशो मूले लक्ष्मीर्मध्ये च संस्थिता
तस्मादग्रं च मूलं च मध्यमं परिवर्जयेत् ।

एकतूदं सदारोग्यं द्वितूदं निष्फलं भवेत्
अतिश्रेष्ठं त्रितूदञ्च अधिकं नैव दूष्यति ।

ताम्बूलस्थलविशेषः :–

[6]प्रत्युषसि भुक्तसमये परयुवतीनां च सङ्गमे विरमे
[7]राजानि विद्वन्मध्ये ताम्बूलं यो न खादेत्स पशुः ।

ताम्बूलद्रव्यकालमानविशेषाः :

[8]पूर्वाह्णकाले तु फलं प्रगाढं चूर्णाधिकं स्याद्दिवसस्य मध्ये
पत्रै···नितरां रजन्यां ताम्बूलमेतद्वपुषो हिताय ।

न्यूनाधिकगुणाः :–

[9]पर्णाधिक्ये दीपनी....तूदाधिक्ये रूक्ष....
चूर्णाधिक्येनोष्णदुर्गन्धदायी साराधिक्ये खादिरेण··· ।

1शयने आ–पाठः । 2यजने–आ । 3दिषु–आ ।
4वरमेतदिष्टम्–आ । 5पत्रं...दूष्यति एते आ–पाठे न ।
6प्रत्यूषे–आ । 7विद्वद्राज्ञां मध्ये–आ ।
8पूर्वाण्हे क्रमुकाधिक्यं मध्यान्हेऽधिकचूर्णता रात्रौ तु पर्णबाहुल्यं त्रिधा ताम्बूल-लक्षणम् ॥–आ । 9पर्णाधिक्ये...पलाशैः । एतौ आ पाठे न ।

रोगो भवेत्पूगदले समाने विरागता पूगफलाधिकत्वे
चूर्णाधिके चास्य सुगन्धहानिस्सौरभ्यहानिर्बहुभिः पलाशैः ।

विष्टम्भ[1]शूलादिहरं क्रिमिघ्न [2]मुष्णं सुगन्धं वदने ददाति
[3]दन्तोष्ठरागं कुरुते नराणां शाखामृगोऽपि स्मरसन्निभः स्यात् ।

[4]चूर्णं वातहरं चोष्णात्कटुकपत्रं कफापहम्
फलं कषायं पित्तघ्नं ताम्बूलं च त्रिदोषजित् ।

चूर्णाधिक्ये च दौर्गन्ध्यं [5]पूगाधिक्ये...
[6]फलाधिक्येन सौगन्ध्यमेतत्ताम्बूललक्षणम् । ॥ ५२० ॥

[7]प्रातः पूगाधिकं कुर्यान्मध्याह्ने चूर्णसंयुतम्
रात्रौ पत्रस्य बाहुल्यमेवं ताम्बूलमाचरेत् ।

ताम्बूलरससेवाक्रमः :

[8]आदौ प्रपीतो विषतुल्यमेति द्विसंयुतोरुर्जरतामुपैति
पश्चात्प्रपीतस्तु सुधासमानस्ताम्बूलसञ्जातरसो नराणाम् ।

ताम्बूलचर्वणरसगुणाः :–

[9]ताम्बूलचर्वणरसं रुचिवर्णसौख्यं
सत्वाग्निदीप्तिरति...करं सदस्यम्

1शूलार्तिहरं–आ–क । 2हृद्यं–आ वृष्यं–क । 3दन्तेषु रागं–उ–क ।
4चूर्णं...त्रिदोषजित्–आ पाठे न । चूर्णं...माचरेत् एते उ– पाठे न ।
5वृष्यघ्नं तु फलादिकम्–आ ।
6फलपत्रैः समं कृत्वा ताम्बूलं भक्षयेद्बुधः–आ–पाठः ।
7प्रातः...चरेत् आ–पाठे न । 8आदौ विषोपमं पीतं द्वितीयं भेदि दुर्जरम् । पश्चात्सुधासमं (धोपमं उ–क–पाठः) पीतं सम्यग्जीर्णं सुखावहम् ।। (रसायनं–क) आ–उ–क ।
9ताम्बूल...कीलजांश्च एतौ उ–पाठे न ।

दुर्नामवातकफशोफहरं क्रमघ्नं
मेध्यं रसायनवरं समुदाहरन्ति ।

अन्यत् :–

ताम्बूलचर्वणरसस्थिरदन्तवर्ण मारोग्यदं रुचिकरं रतिकृच्च वर्ण्यम्
वातापहं ह्लादकरं सुखदं केश्यं रसायनवरं गदकीलजांश्च ।

[1]तत्कल्पलेपनमुदग्रबलाग्निनाशं पाण्ड्वामयप्रद…तीक्ष्णम्
वृष्यं स च श्वसनपीनसमूत्रकृच्छ्र मेहप्रदं नयननाशकरं वदन्ति ।

अतिताम्बूलगुणाः :–

दन्तावलिदुर्बल[2]तातिरूक्षं पाण्डुत्वमङ्गे नयनादिकेषु
बलक्षयं वक्त्रगदान्करोति ताम्बूलमत्यन्तनिषेवणेन ।

पाठान्तरे :–

[3]दन्तदौर्बल्यपाण्डुत्वमक्षिरोगं बलक्षयः
[4]वितनोत्यास्यदोषांश्च ताम्बूलमतिसेवितम् ।

ताम्बूलवर्ज्यरोगाः :

[5]ताम्बूलं न हितं कृशक्षतवतां रक्तास्यशोफात्मनां
रूक्षा… … … मूर्च्छावतां मेहिनाम्
रोगक्षीणविषातुरस्य…शान्तः परं कृच्छ्रिणां
पाण्डुक्षीणपयोभुजां ज्वरवतां तृट्पीडितानामपि ।

1तत्कल्प…निषेवणेन–एतौ आ–पाठे न । तत्कल्कसेवन–क ।
2ताक्षिरोगान्–उ ।   3दन्तदौर्बल्य…पीडितानामपि एतौ उ–पाठे न ।
4करोति मुखरोगञ्च–आ ।
5ताम्बूलं न हितं…नरः एतौ आ–पाठे न ।

पाठान्तरे :–

कुष्ठी च मधुमेही च [1]मूत्रदोषयुतो नरः
अक्षिरोगी क्षयी पाण्डुरोगी [2]भ्रममदज्वरी ।

अपस्मारी श्वासरोगी हृद्रोगी रक्तपैत्यकी
ग्रहणीवानतिसारी च ताम्बूलं परिवर्जयेत् । ॥ ५३० ॥

पाठान्तरे :–

ताम्बूलं क्षतपित्तासृग्रूक्षोत्कुपितचक्षुषाम्
विषमूर्च्छामदार्तानामपथ्यं शोषिणामपि ।

अन्यत :–

[3]ताम्बूलं नैव सेवेत सुविरक्तो बुभुक्षितः
श्रमी च मूत्रकृच्छ्री च क्षीरमभ्यवहृत्य च ।

ज्वरी पिपासी हृद्रोगी....ध्वश्रमपीडितः
न खादेदुपवासार्तस्ताम्बूलं पाण्डुरोगवान् ।

मद्यपीतस्तृषार्तश्च क्षीणरेतोज्वरातुरौ
रक्तपित्ती नेत्ररोगी ताम्बूलं परिवर्जयेत् ।

ताम्बूलमुखनिद्रा :–

लाला[4]च्युतिं पाण्डुविवर्णमग्रे [5]दन्तातिदौर्बल्यमुपैति जन्तोः
[6]विजृम्भणं वक्त्रगलामयानां निशासु ताम्बूलमुखेन [7]निद्रा ।

---

[1]मूत्रदोषी च ना भवेत्–उ । [2]मदात्ययी आ–क ।
[3]ताम्बूलं...परिवर्जयेत्– एते आ–पाठे न । ताम्बूलं...त्यजेत् (५३७) उ–पाठे न ॥ [4]सृतिः–आ । [5]दन्तावलिर्दुर्बलतामुपैति–आ ।
[6]निबृंहणम्–आ । [7]सुप्तः–आ ।

असेव्यानि :—

[1]पर्णाग्रं पर्णपृष्ठञ्च चूर्णपर्णं द्विपर्णकम्
दन्तधावनपर्णेन शक्रस्यापि श्रियं हरेत् ।

...   ...   युग्मं चूर्णेनान्तःप्रलेपितम्
दन्तक्षालन....   .... चूर्णपर्णं .... त्यजेत् ।

गुलिकाः :—

कर्पूरजातीफलचन्दनेलालवङ्गतक्कोलफलैः सुपिष्टैः
सारेण सार्धं खदिरद्रुमस्य कृताभिरञ्जयात् गुलिकोत्तमाभिः ।

आवासिताभिः कुसुमैर्मनोज्ञा कस्तूरिकामोदमनोहराभिः
दन्तालिदौर्बल्यनिवारणाय सदा प्रचण्डास्यगदोपशान्त्यै ।

[2]श्वेतं खदिरसारस्य पलमेकं सुचूर्णितम्
निष्कप्रमाणमेला च लवङ्गञ्च तथैव च । ॥ ५४० ॥

जातीफलं द्विनिष्कं च वरालं च त्रिनिष्ककम्
मृगनाभिश्च कर्पूरं तक्कोलं च पृथक् पृथक् ।

कर्षमात्रं तु सञ्चूर्ण्य खदिरेण विमिश्रितम्
प्रसूनतोये सम्पिष्टश्चन्दनेन च मेलयेत् ।

मात्राप्रमाण...छायाशुष्कांश्च कारयेत्
मुखेन धार्या गुलिका वृष्या रुच्याग्निदीपनी ।

1पर्णाग्रं...हिमान्वितम् (५५२) आ पाठे न ।
2श्वेतं...दुर्लभाः (५५३) एते–उ पाठे न ।

त्रिदोषशमनी हृद्या वर्णसौभाग्यकारिणी
ताम्बूलमध्ये निक्षिप्य यः खादेद्बुद्धिमान्नरः ।

वक्त्रजातगदैरास्यदौर्गन्ध्यैः तस्य वर्जनम्
सम्भोगकाले रुचिकृद्बृंहणं पुष्टिवर्धनम्

क्षयान् क्षयकृतान्रोगान् शमयेत्पाण्डुकामलान् ।

कस्तूरीगुलिका :—

कस्तूरी खदिररसो लवङ्गमेला च तक्कोलम्
वरघनसार चन्दनश्च पिष्ट...मृदुलप्रसूनतोये ।

मुक्ता...गुलिका मुखेन धार्या रुच्या वृष्या दीपनी बृंहणी वा
ताम्बूले प्राणिभिः सेवनीया पूर्ति वक्त्रेरागजालं निहन्ति ।

खदिरसारगुणाः :—

खदिरतरुजसारं सेवितं हन्ति मेहान्
क्रिमिजरुजविनाशं कुष्ठरोगानशेषान्
द्विजदृढपदकारी चास्यरोगेषु शस्तं
कफमुखनयनोत्थान् सर्वदोषान् निहन्ति ।

पाठान्तरे :—

सारः संसारसारः खदिरतरुभवः कर्णदग्धोष्ठकुष्ठान्
मेहान् रोगाननेकान् वदनपरिणतान् शूलकासाग्निमान्द्यान्
...द्भूततृप्तिं क्रिमिकुलजनितव्याधिंनिर्मूलदक्षो
वातश्लेष्माणमुग्रं प्रहरति दशनस्थैर्यसम्पादकारि ।

खदिरमिश्रताम्बूलम् :—

मुखरोगक्रिमिहरं खदिरेण विमिश्रितम्
दन्तानां सुस्थिरत्वञ्च वक्त्रदुर्गन्धनाशनम् । ॥ ५५० ॥

वातश्लेष्महरं भेदि रक्तपित्ताग्निवर्धनम् ।

कर्पूरमिश्रताम्बूलम् :—

श्लेष्मरोगहरं रुच्यं नेत्ररोगहरं परम्
नासारोगहरं कण्ठ्यं ताम्बूलं तु हिमान्वितम् ।

प्रातःकाले च ताम्बूलं सुरतान्ते च निद्रता
अन्नमध्ये पयःपानं त्रयः स्वर्गेऽपि दुर्लभाः ।

[1]अनन्तविज्ञानमनन्तवीर्यमनन्तसौभाग्यमनन्तदर्शनम्
बिभर्ति यत्सज्जनमाननीयं ताम्बूलवर्गो विनिगद्यतेऽत्र ।

ताम्बूलं चर्वयेद्भुक्त्वा प्रागेव त्रिचतुस्तथा
एकपूगं चतुष्पत्रं सुधा[2]व्रीहिद्वितीयकम् ।

निःशब्दं परिहीणचूर्णितबहिर्लेपं शनैः खादितं
अन्तर्गण्डरदोष्ठयुग्मरसनासंरञ्जकव्यापनम्
किञ्चित्सारकटुत्वकल्कमयतां प्राप्तं त ः ष्ठीवितं
ताम्बूलं यदि भक्ष्यते नरवरैरेवं सदा सौख्यदम् ।

यथा क्रमुकपर्णयोरुचितचूर्णमिश्रीकृता
कषायगुणवर्जिता कटुकभावमभ्यागता
परं भवति वीटिका यदिदमोदनं (१) वर्जयेत्
तथैव विहितं बुधैर्वदनतो बहिः ष्ठीवनम् ।

चर्वणाय खलु युज्यते जलैः पूर्वलेपरहिते मुखे पुनः
चर्विता यदि नरेण वीटिका कुर्वती वदनमङ्गलश्रियः ।

1अनन्तविज्ञान…पूज्यम् (५९८) एते आ ग्रन्थ एव ।
2मात्रा यथाक्रमं–क ।

क्षीरं पीत्वा मुहूर्तेन ताम्बूलं यदि चर्वितम्
कुष्ठी भवति मेही च मूत्रदोषी च वा भवेत् ।

क्षीरं कपित्थं पनसं तथाम्रं फलं कदल्याश्च तथेक्षुदण्डम्
मद्यञ्च यूषञ्च रसं कषायं घृतस्य पानं मधु नारिकेलम् । ॥ ५६० ॥

. . . .

पीत्वा वसित्वा घटिकां तथैकां ताम्बूलमात्रेण विषं भवन्ति ।

पर्णमूले भवेद्व्याधिः पर्णाग्रे पापसम्भवः
चूर्णपर्णं हरत्यायुः सिरा बुद्धिविनाशिनी ।

तस्मादग्रं च मूलं च सिरां चैव [1]विवर्जयेत्
चूर्णपर्णं वर्जयित्वा ताम्बूलं [2]खादयेद्बुधः ।
चूर्णं पर्णस्य यस्योदरतलनिहितं चूर्णपर्णं तदाहुः
यत्पर्णं कीटदष्टं रसगुणरहितं पल्लवं कृष्णवर्णम्

चूर्णं चाप्यश्मयुक्तं सितगुणरहितं शुष्कमस्निग्धभावं
पूगं निःसारमार्द्रं क्रिमिगुणसहितं दारुरूपं च वर्ज्यम् ।

पूगं निष्कयुगप्रमाणमुचितं पत्रं मनोजन्मनः
प्रोक्तं मार्गणसंख्यनिष्कसहितं चूर्णं फणानां त्रयम्
यावत्तावदुदाहृते परिमितं ताम्बूलमारोग्यदं
पूगाभ्यन्तरपत्रचूर्णजनिमत्कीटाश्मसंवर्धितम् ।

ताम्बूलवल्लीदलमाददीत उद्वर्त्य वस्त्रेण विपाटयित्वा
विलिप्य चूर्णञ्च पिटं विधाय तद्द्व्यङ्गुलोन्मानानिकृन्तपार्श्वम् ।

---

[1] परिवर्जयेत्–ख । [2] चर्वये–क ।

सुधापाषाणजं वापि शङ्खेनापि विनिर्मितम्
शुक्तिशम्बूकसंभूतं चूर्णं मुक्ताफलोद्भवम् ।

मनसो हर्षदं श्रेष्ठं रतिदं मदकारणम्
मुखरोगक्रिमिहरं ताम्बूलं चन्द्रसंयुतम् ।

मुखरोगक्रिमिहरं खादिरेण विमिश्रितम्
दन्तानां सुस्थिरत्वञ्च वक्त्रदुर्गन्धनाशनम् ।

वातश्लेष्महरं भेदि रक्तपैत्यविवर्धनम्
श्लेष्मरोगहरं रुच्यं नेत्ररोगहरं शुभम् । ॥ ५७० ॥

खण्डीकृतं व्यपेताग्रं कषायेतं सुगन्ध्यपि
कर्पूराद्यैः प्रसूनैश्च वासितं च विभक्षयेत् ।

नोचेद्दन्तस्य शैथिल्यं फलं दन्तैर्विखर्जनात्
कर्णनेत्रशिरोरोगः हनुस्रंसस्तु जायते ।

पूगश्चेन्मृगनाभिगन्धरहितस्तद्वासनाद्भक्षणं
कर्पूरेण तथैव येन कुसुमैर्गन्धैरनेकैर्वहन्
तस्मात्कालशरीरदेशविकृतिं ज्ञात्वा च तद्भक्षणं
पानीयादि समस्तवस्तुकरणं चोपाधिभेदाद्भवेत् ।

घोण्टा कटुकषायोष्णा काठिना रुचिकारिणी
मलविष्टम्भिनी सा च क्रिमिरोगहरी परम् ।

आमं पूगं कषायं मुखमलशमनं कण्ठशुद्धिं विधत्ते
रक्तामं श्लेष्मपैत्यप्रशमनमुदराध्मानहानिं निरस्यात्

... ...
... ... ।

ताम्बूलीदलमास्यपिच्छिलहरं प्राग्भूतदुर्गन्धजित्
स्वर्यं तिक्तकषायमुष्णविशदं श्लेष्मानिलघ्नं परम्
सद्यस्तापितभक्षितं मुखरुजाजाड्यापहं दोषहृत्
दाहारोचकरक्तदायि मलकृद्विष्टम्भि कान्तिप्रदम् ।

कृष्णं पर्णं तिक्तमुष्णं कषायं दन्तैर्जाड्यं वक्त्रदाहामयघ्नम्
शुभ्रं पर्णं श्लेष्मवातामयघ्नं पथ्यं रुच्यं दीपनं पाचनञ्च ।

भक्षणं चूर्णपर्णस्य लक्ष्मीसौभाग्यनाशनम्
ब्रह्मविष्णुशिवास्तत्र तत्र तत्र यथाक्रमम् ।

पर्णमूले भवेद्व्याधिः पर्णाग्रे पापसंभवः
पर्णमध्ये भवेत्पीडा शिरा बुद्धिविनाशिनी ।

द्विपर्णं चूर्णपर्णञ्च शक्रस्यापि श्रियं हरेत् । ॥ ५८० ॥

ताम्बूलवल्यास्तु दलं सुसान्द्रं सुश्वेतहेमाभमतीव सौख्यम्
वराहकर्णप्रतिमं सुरक्तदेशोद्भवं स्याद्विविधामयघ्नम् ।

कर्पूरगन्धोदकभावितं तद्रौप्ये करण्डे परिपूरितञ्च
तथा युवत्याः करपल्लवेन सुरक्षितं सौम्यदिशि प्रशस्तम् ।

चूर्णं शङ्खाश्मशम्बूकमुक्ताशुक्तिकजं स्मृतम्
क्षारं सलवणं शङ्खचूर्णं कायाग्निवर्धनम् ।

मेदोविशोषणं रूक्षं क्रिमिश्लेष्मसमीरनुत्
अत्युष्णं तीक्ष्णकटुकं चूर्णमश्मभवं लघु ।

पैत्यप्रकोपनं रूक्षं विशेषाच्छ्लेष्मनाशनम्
मुक्ताभवोद्भवं चूर्णं वातलं पैत्यशूलनुत् ।

विशेषात् पैत्यभूयिष्ठान् जयेत्कुष्ठगदान्यथा
तीक्ष्णोष्णं शुक्तिजं चूर्णं रोचनं लघुदीपनम् ।

चूर्णं मुक्ताफलोत्थं युतजलमुदरश्लेष्मपैत्यापहं स्यात्
पैत्योत्थं नेत्ररोगं हरति च नितरां धातुपुष्टिं विधत्ते
वर्ण्यं वृष्यं विशेषाद्बलकरमुदितं सौख्यसौभाग्यकृत्स्या-
दाहातीसारमूर्च्छाभ्रममदविषहृत् सर्वसौख्यं तनोति ।

पैत्ये मौक्तिकचूर्णमात्रसहितं मिश्रोदकं द्रावितं
क्षिप्तं राजतपात्रमध्यविहितं ज्योत्स्नावितानस्थितम्
सौम्येयां हितमग्निदेशनिहितं हेमादिसंलेपितं
शस्तं वातकफे तु हेमविहितं शङ्खादिजं भोजनम् ।

चूर्णं त्वायसभाजने नयनयोः पथ्यं सुशीतं भवेत्
पैत्यघ्नं तदुशन्ति राजतमयेष्वेवं कफघ्नं बुधाः
दोषारोचककुष्ठमेहगरलप्लीहामयान् काञ्चने
क्षिप्तं कांस्यमये तु तानि जनकं पैत्यप्रकोपं विदुः ।

एकपूगं पञ्चपर्णं चूर्णं निष्पावमात्रकम्
कर्पूरन्तु तदर्धं स्यात्तत्कोलं त्रिचतुष्टयम् । ॥ ५९० ॥

क्रमुकन्तु द्विनिष्कं स्यात्पञ्चनिष्कं तु पत्रकम्
चूर्णं निदानसम्मिश्रं ताम्बूलमितलक्षणम् ।

एकद्वित्रिचतुःपञ्चषड्भिः पूगीफलक्रमात्
लाभालाभौ सुखं दुःखं आयुर्मरणमेव च ।

स्वप्नं कृत्वा जलं पीत्वा रतं कृत्वा फलादिकान्
भुक्त्वा क्षणं समाश्वस्य ताम्बूलं भक्षयेद्बुधः ।

तत्कल्कं सेवितं रूक्षं अरुच्यं वह्निनाशनम्
अरुच्यं पीनसश्वासपाण्डुकृच्छ्रप्रमेहकृत् ।

अश्वारोहे तथाध्वाने रतिकाले महातपे
क्षुत्पिपासाधिके दोषे तापे चन्द्रः प्रशस्यते ।

सर्वाङ्गवाते शोफे च मन्दाग्नौ दुर्दिने तथा
हनुमन्याशिरोरोगे मृगनाभिः प्रशस्यते ।

कामं प्रदीपयति रूपमतिव्यनक्ति
सौभाग्यमावहति वक्त्रसुगन्धितञ्च
ऊर्जं करोति कफजांश्च निहन्ति रोगान्
ताम्बूलमेव परमांश्च निहन्ति रोगान् ।

पाण्डु....मेहप्रकटितनयनोन्मादतृष्णातुराणां
संशुद्धक्षीरभुक्तश्रममदविषपैत्यास्रशोफान्विताना म्
मूर्च्छातीसारकृच्छ्रप्रदरवमिमहादेहदाहार्दितानां
त्वग्दोषापसृतीनां क्षतसमयात्रिसर्पान्वितानां न योग्यम् ।

ताम्बूलपञ्चकम् :–

[1]कस्तूरीपरिमोदतूदशकलं कर्पूरसंमिश्रितं
मुक्ताचूर्णसमेतामिन्दुशकलं स्वच्छाहिवल्लीदलम्
तत्तादङ्म .... व्यतिकरं प्रस्थान...
....कलापिनि प्रियतमे ! ताम्बूलमानीयताम् ।

---

[1]कस्तूरी...अर्कतारा: एते (६०३) आ–उ पाठयोर्न सन्ति ।

...कारपयोधरे तनु......कारक्रियां
ताम्यन् .... तन्त्रीसमालापिनि
ताटङ्कान्ततरङ्गिताक्षियुगले व्य...धरे
....रसनं तव करात्ताम्बूलमानीयताम् ।   ॥ ६०० ॥

त्वन्नेत्राञ्चलवत्प्रपञ्चकामिदं त्वन्मध्य मुष्टिना
ग्राह्यं .... वन्निशिमुखैं .... विलासास्पदम्
त्वच्चेतोनव . . . रागसदनं . . . . . .
स्वादिष्ठञ्च तवोष्ठवत्तरुणि यत् ताम्बूलमानीयताम् ।

बाले मे तरुणीयहस्तकरुहं . . . मिदं कथ्यतां
कान्ते तावकमन्दहासविलसत्कर्पूरचूर्णान्वितम्
एत . . . . . . पूगरुचिरं त्वद्गण्ड . . . .
त्वन्मधुराधरामृतरसं ताम्बूलमानीयताम् ।

उत्पन्नं नागलोके वहति परिमलं वातपित्तौघहारि
शृङ्गारि . . . भटसमये सर्वकालस्य भोग्या
दत्तानां . . . स्फुटमाणिकिरणैः कुङ्कमावर्तरेखैः
ताम्बूलं दैवयोग्यं तव . . . सखे यावदिन्द्वर्कताराः ।

प्रकीर्णाधिकारः

पानीयपञ्चकम् :—

[1]रे रे रुद्रजटाटवीपरिमलव्यालोलभस्माङ्कुलं
प्रोन्मीलत्सुरसुन्दरीकुचतट...वच्छीनलम्

---

[1]रे रे...मानीयताम्—आ—उ—क पाठयोः न स्त ।

धारासार . . . करतल विनिःशेषदोषापहं
गङ्गातुङ्गतरङ्गभङ्गगहनं पानीयमानीयताम् ।
स्वच्छं सद्यो . . . वल्लघुतरं दिनाधि...तलं
पुत्रालिङ्गनवत्तथैव मधुरं तद्वाह्यसञ्जल्पवत्
एलोशीरलवङ्गचन्दनमिलत्कर्पूरकस्तूरिका
पाटल्य . . . केतकी सुरभितं पानीयमानीयताम् ।

[1]दर्पणभेदाः :–

दर्पणं त्रिविधं प्रोक्तं काचं कांस्यं सुतीक्ष्णकम्
निकृष्टं मध्यमं श्रेष्ठं क्रमात्तेषां फलं स्मृतम् ।
काचं श्री . . . यं हरत्यायुः कांस्यं . . .
तीक्ष्णं च निर्तुलं पुण्य मायुर्लक्ष्मीयशस्करम् ।
एकरूपं तु यस्यापि तद्ग्राह्यं वैकृतं त्यजेत्
प्रभुत्वं श्रियमानन्दं शुभमायुर्यशस्करम् ।
वर्षावातातपं दाहं पैत्यनेत्ररुजं श्रमम्
शीतशोषपरिहरं फलकस्य गुणं स्मृतम् ।
वाता . . . . . . फलं तेषामुदीरितः
भद्रं श्रेयः . . . देवयोग्यं यशस्करम्
भूतप्रेतापिशाचादि जारचोरभयापहम् । ॥ ६१० ॥

तत्तद्व्यजनगुणाः :–

औशिरं व्यजनं त्रिदोषशमनं वृष्यं परं शीतलं
तालं खेदविदाहतृट्क्लमहरं वाशं तु पित्तप्रदम्

---

1 'दर्पणभेदाः'–इत्यारभ्य स्त्रीसेवाप्रकारणवधि नास्ति ।

मायूरं त्वनिलापहं बलकरं चारोग्यदं श्रीकरं
त्वायुर्वीर्ययशस्करं श्रमहरं लक्ष्मीप्रदं चामरम् ।

व्यजनानिलगुणाः :–

शोषश्रमस्वेदविदाहमूर्च्छाहरो नराणां व्यजनानिलश्च
निद्राकरः प्रीतिसुखप्रदायी पित्तापहो वीर्यविवर्धनश्च ।

. . . .

त्रिता . . . . वर्तुलं चारुवर्धनं श्रीनिकेतनम्
मनोहरं सुखं कुर्यात्सभामण्डलमण्डनम् ।

शशाङ्कधवलप्रभं चामरं चारुभूषणम्
लक्ष्मीकराक्ष . . . . सर्वदोषनिवारणम् ।

वालैः कृतं यद्व्यजनं . . . . कादंशनिवारणञ्च
ओजस्करं श्रीकरमाहुरार्यास्तुरङ्गवालव्यजनं मनोज्ञम् ।

प्रवातगुणाः :–

प्रवातमग्निं च निहन्ति कान्तिं विवर्णतां स्तम्भनमातनोति
सुखं प्रवातं परिसेवनीयं . . . . त्तरवासरेषु ।

निवातगुणाः :–

निवातमायुःप्रदमाहुरार्या नीरोगतां चापि सदा करोति

आतपः

स्यादातपः पित्ततृषौ करोति मूर्च्छाश्रमस्वेदविवर्णकारी ।

छाया :–

छाया कान्ति . . . वृष्या बुद्धीन्द्रियबलप्रदा
तृ . . . कार्श्यशमनी स्निग्धापित्तप्रसादनी ।

वह्निः :–

वह्निश्च धत्ते कफवातरोगान् स्तम्भं जये . . . प्रकोपम्
. . . मभिष्यन्दमपि प्रमार्ष्टि क्षतो . . . पित्तं परिसेवनेन ।

पाठान्तरे :–

वह्निर्विधत्ते कफजिद्वातशीतज्वरापहः
अजीर्णशूलमामघ्नं दाहपित्ततृषाकरी । ॥ ६२० ॥

ज्योत्स्ना :–

कषायमधुरा ज्योत्स्ना पित्ततृड्दाहनाशनी
अभिष्यन्दकरी चैव नेत्ररोगहरी गुरुः ।

तिमिरम् :–

तिमिरं भीतिकृद्रोगजागरं भयनाशनम् ।

. . . .

. . . ञ्जुः शुभदं शिवप्रिय . . . हरं
जारचोरभयप्रदं रतिकरं पर्वाणि संदृश्यते
वातश्लेष्महरं प्रभुत्वकरणं मृत्युं जयेच्छ्रीकरं
सर्वं नश्यति भूतदुष्कृतभयं निम्नोन्नतं लक्ष्यते ।

हर्म्यम् :–

कुन्देन्दुप्रतिमं हर्म्यं श्लेष्माटोपनिबर्हणम्
कीर्तिदं श्रीकरं नृणामानन्दोन्नतिकारणम् ।

सुधागेहानि :–

सुधातिशुभ्राणि मनोहराणि गेहानि रम्याणि विचित्रितानि
नानाप्रकाराणि मयोदितानि कफानिलघ्नानि भवन्ति लोके ।

पाषाणगेहं :—

पाषाणनिर्मितं गेहं शीतवातनिवारणम्
मनो . . . निवासं स्याद्वातादि गदनाशनम् ।

सिक्थारिक्तपदप्रपञ्चविहितं गेहं सदानन्ददं
सौभाग्यप्रदमङ्गनाजनमनःप्रह्लादनायार्जितम्
जञ्झामारुतनाशनं कफहरं पित्तस्य विच्छेदनं
प्रावृट्कालहितं प्रवृद्धसुखदं जात्यग्रहध्वंसनम् ।

क्षितिभवनमशेषप्राणिनां शीतबाधां
प्रहरति पवमानक्षोभमत्यन्तराग्निम्
जनयति तनुकान्तिं मेदसो वृद्धिहानि
श्चरणकमलशोभामायुषः पालनञ्च ।

पानीयशाला विनिहन्ति तृष्णां दाहापहारी पथिकश्रमघ्नी
पित्तं समुत्पादयति क्षणेन निद्राकरी कान्तिकरी च शीता ।

काचमन्दिरमुशन्ति नराणां प्रीतिदं कतिविनोदनिदानम्
. . . . . . वारणदक्षं नेत्रकौतुककरं कमनीयम् । ॥ ६३० ॥

तृणनिर्मितगेहं तु सुखसौभाग्यकारणम्
वातातपरजोनाशं . . . भूतत्रिदोषहा ।

अश्वारोहणम् :—

अश्वारोहणमग्निदीपनकरं बल्यं वयःस्थापनं
. . . . शोफशोषणकरं स्वेदोद्गमोत्पादनम्
सद्यः कान्तिविवर्धनं तनुभृतां कीर्तिप्रदं श्रीकरं
नो शस्तं क्षयिणां भगन्दरवतां पित्तास्रजन्तोरपि ।

गजारोहणम् :—

आरोहणं कुरु ··· लक्ष्मीनिलयं वदन्ति
अखण्डकीर्तेरपि हेतुभूतं मेदःकफघ्नं जठराग्निकारि ।

उष्ट्रारोहणम् :—

उष्ट्रारोहण . . . शोदयहरं सौभाग्यनिर्नाशनं
सर्वाङ्गेषु रज . . . ··· कुष्ठं नराणां सदा
श्लेष्माटोपनिवारणं गुद ··· नायोदितं
कुर्यात्पित्तविजृम्भणं ज्वलनदं स्वप्नेऽपि नो शस्यते ।

आन्दोलिकारोहणम् :—

श्रीकरं वश्यकारि चक्षुष्यमायुष्यबलं करोति
दोषत्रयघ्नं वितनोति पुष्टिं तृड्दाहमोहश्रमदोषहारि ।

शिबिकारोहणम् :—

श्रीकरं च पवित्रं च श्रेष्ठमारोग्यकारणम्
सौभाग्यवर्धिनी ह्यद्या शिबिका राजपूजिता ।

रथारोहणम् :—

रथगमनमुशन्ति प्राणिनामङ्गशक्ति
व्यधकरमतिदाहं वातमोक्षैकदक्षम्
विततगदकफघ्नं पित्तकोपः समूलं
जनयति जठराग्निं देहमर्मास्थिदुःखम् ।

कूर्मपृष्ठोदराकारं रक्तवस्त्रावकुण्ठनम्
कूर्म ··· वातशमनं महादार्ढ्यनिवारणम् ।

छत्रपत्रकगुणाः :—

छत्रन्तु वातातपवर्षदाहनिवारणं नेत्रहितं च
बल्यं ... पत्रं भवेत्कण्टकशङ्कानिवारि पादामयहारि ... नेत्र्यम् ।

पादुकाधारणम् :—

अलङ्कृतं पादुकाधारणं स्याद्वाताश्रितं रोगकुलं निहन्ति
अमेध्यशङ्कादिनिवारणं स्यादोषत्रयस्यापि हितं विधत्ते । ॥ ६४० ॥

भूशय्या :—

भूशय्या वातशमनी बृंहणी .... ।

खट्वा :—

त्रिदोषशमनं हृद्यं तुष्टिपुष्टियशःप्रदम्
बल्यं कण्डूश्रमहरं खट्वाशयनमुच्यते ।

एकवृक्षं सदारोग्यं द्विवृक्षं मध्यमेव च
त्रिवृक्षं व्याधि ... च चातुर्वृक्ष्यं च नाशनम् ।

स्वगृहे पूर्वशिरसः सर्वदा दक्षिणे शिरः
प्रयाणे पश्चिमशिरा न कदाचिदुदक्छिराः ।

प्रसूनशय्या :—

प्रसून ... तुल्यः कामव्यापारकारणः
श्रमदाहहरः सौख्यः श्यामलश्च समीरणः ।

प्रवालशय्या :—

शय्या विरचिता पत्रैः प्रवालैरतिकोमलैः
दाहपित्तोपशमनी वियोग .... निवारिणी ।

तथैव कदलीदर्भदलो . . . . शोभिनी
शय्या विरचिता तद्वत्पङ्कजच्छदनं . . . ।

पत्रैः कल्हारजैर्नूत्नैः कृता शय्या मनोहरा
प्रियाविरहजं दुःखं रक्तपित्तश्च धारयेत् ।

निद्रासञ्जननी खट्वा हृद्या दंशनिवारणी
श्रमक्लमहरं कुथ्यं वातपित्तनिवारणम् ।

. . . श्रमहारि वृष्या पुष्टिनिद्रा धृतिप्रदा
सुखशय्यासना हृद्या वातला मूत्रवर्धिनी । ।' ६५० ॥

वातघ्नं स्वेदकृद्बल्यं यशस्यं पुष्टिवर्धनम्
तल्पं लक्ष्मीकरं चैव मेदोरक्तप्रसादनम् ।

उपधानं शिरोरोगश्वासकासनिवारणम् ।

खड्गधारणम् :–

भूतग्रहभुजङ्गानां कुमित्राणां च नाशनम्
अवष्टम्भनमायुष्यं भयघ्नं खड्गधारणम् ।

चापाभ्यासः :–

मेदोच्छेदकरं त्रिदोषशमनं कायाग्निसन्दीपनम्
गात्राणां . . . . . . कान्तिप्रदं पुष्टिदम्
आरोग्यप्रदविग्रहग्रहगतश्शक्तेः समुत्पादकं
चापभ्यासरसायनं प्रतिदिनं को नाम यो सेवयेत् ।

दण्डधारणम् :–

सत्योत्साहबलस्थैर्यधैर्यवीर्यादिवर्धनम्
अवष्टम्भ रक्षोघ्नं दण्डधारणम् ।

पादसंवाहनम् :—

संवाहनं मांसरक्तत्वक्प्रसादकरं परम्
श्रमानिलहरं हृद्यं पुष्टिनिद्राधृतिप्रदम् ।

भेर्यादिवाद्यध्वनिगुणाः :—

भेरीशङ्खमृदङ्गतालपटहाढक्कादिना स्वरं
.... करतालगोमुख .... दुक्का .... शृङ्ग्यादिकम्
वीणाकाहलवेणुनादसुषिरा घण्ट ... तानस्वरं
ताम्रं कांस्यसुवर्ण ... रजतं ... कृतै राजतम् ।

तत्तद्वाद्यविशेषघोषजनितः शब्दो महान् जृम्भते
श्रुत्वा ... पलायनं शुभकरं भीतिप्रदं कुर्वते
लक्ष्मीकरं ... पुष्टियशस्करं नृणां भेर्यादि
वाद्यध्वनिपुण्यकीर्तिदम् ।

सुगन्धधूपाः :—

तगरागरुतैलजकुष्ठगणैरभयापुरचन्दन सज्जरसैः
नखरत्व .... शिलाजतुचन्द्र भिरभूमि ।

रचितो दशसप्तगुणैः मितैस्तगरै रुचिरसुरकिन्नर यक्षगणैः
शुभकृन्मलदुर्भग हरं प्रथितो भुवि भूपनराधिपतिम् । ॥ ६६० ॥

चतुर्दशाङ्गधूपः :—

कुष्ठदेवतरु त्रैजातकं शर्करा
मुस्ता बिल्व सर्वं समं गुग्गुलुः

धूपोऽयं कमलापातिप्रियकरं श्रेष्ठोऽतिपुण्यप्रदो
निर्दिष्टो हि चतुर्दशाङ्गक इति त्रैलोक्यसंमोहनः ।

दशाङ्गधूपः :–

पथ्या सैन्धवदेवदारु लाक्षागुडै
स्तुल्यांशैः पुरसंयुतोर्निगदितो धूपो दशाङ्गाभिधः
देवानामपि दुर्लभो मदकरो सौभाग्यकृच्छोभनः
प्रौढस्त्रीपरिमोहनो नृपसभारागादिसौगन्ध्यकृत् ।

अन्यत् :–

तोयं कुष्टं तदनु च नखं देवदारुश्च मुस्ता
लेहे यायोजितं खण्डमध्ये
सर्वैरेतैः खरशशिरजोमिश्रितं चूर्णितं तत्
धूपैर्भोग्यं भवति सकलैर्देवयोग्यो दशाङ्गः ।

विद्याधरधूपः :–

चन्दनागुरुकाश्मीरपलिनीकुण्ठदारुभिः
त्रैलोक्यमोहनो वश्यो धूपो विद्याधरप्रियः ।

सर्जरसधूपः :–

सद्यः सज्जरसोध्दतो विनिहरेध्दूपःप्रचण्डानिलान्
श्लेष्मादि...प्रबलं व सञ्चित .... दीनपि

भूतप्रेतपिशाचसङ्गमभयप्रध्वंसनं पापनुत्
देवानां प्रियकृत्प्रियः प्रियरमासङ्गोत्सुकानामपि ।

स्त्रीसेवाप्रकरणम्

स्त्रीवर्ज्याः :–

कुरूपिणीं कुशीलां [1]च विधवां च परस्त्रियम्
जात्युत्कृष्टां च विहीनां च पुत्रमित्रनृपास्त्रियम् ।

त्यजेद[2]न्त्यकुलोद्भूतां वृद्धस्त्रीकन्यकां तथा ।

वयोऽधिकां स्त्रियं गत्वा तरुणः [3]स्थविरायते
तारुण्यं तरुणीं गत्वा वृद्धोऽपि समवाप्नुयात् ।

रति[4]कालैकशयन[5]मन्यकाले तु वर्जयेत्
स्त्रीणां श्वासानिलैः पुंसां दुर्भाग्यत्वं प्रजायते ।

[6]अत्युग्रा विधवा तथान्यवनिता [7]हीनान्ययोनिः कृशा
स्थूलाशस्तकुला था कुसुमिता सूता कुशीलाशुभा
एताभिः सह सङ्गतिर्यदि भवेत्पञ्चेषुपञ्चेषुभिः
तस्य श्रीविपुलायु वैभव .... नश्यन्ति नूनं स्यात् ।   ॥ ६७० ॥

[8]अन्तर्वत्नी गर्भहानिरामयार्ता च कीर्तिहा ।

उत्तमजातिस्त्रियः :–

[9]गम्भीरं वचनं सत्यं मधुरं च सुलोचनैः
सुश्रोणीकेशभाराढ्या कुचभा . . . सुमध्यमा

---

[1]तु-आ ।   [2]दन्य–उ ।   [3]स्थविरो भवेत्–आ ।
[4]कालेषु -उ ।   [5]मन्यत्काले पृथक्शयी–आ ।
[6]अत्युग्रा...मानम् (६८९) एते–उ पाठे न ।   [7]दीना-आ ।
[8]अन्तर्वत्नी···कीर्तिहा–आ–पाठ एव ।
[9]गम्भीरं...सुधारिणी–एते आ–पाठे न ।

सर्वविद्याविशेषज्ञा गीतनादैः सुभाविणी
धर्मज्ञा रतितत्वज्ञा मन्दयाना . . . . ।

शुकवाणी सुकण्ठा च कोमलाङ्गी गुरुप्रिया
श्वेताम्बरधरा . . .श्वेतैः पुष्पैः सर्वसुधारिणी ।

अत्युग्रा हरति प्राणान् निजरागेण मोहितान्
[1]विधवाजनसंसर्ग आयुश्रीक्षयकारकः ।

पाठान्तरे :–

पराङ्गना हरत्यायुर्लोकद्वयसुखं तथा
[2]विशस्तकुलजा कुर्यादधोगतिमनन्तरम् ।

[3]अक्षिरोगमतीसारं मृत्युं पुण्यविनाशनम्
[4]रजस्वला करोत्येव सङ्गमेन विशेषतः ।

आयुः क्षीणं च स्वर्गस्थाः पि . . .
....भङ्गगर्भ...रोगार्त्यायुःश्रीप्रहानिं करोति ।

तैनैतासां पञ्चबाणा .... कोपि प्रायः कुर्यात्सङ्गम .... मनुष्यः
हीनाकृतिं च मलिनां च . . . . . निजरागहीनाम् ।

क्षीणां विशुद्धिराहितां ... न्नुपैति
शुक्रक्षय ... ... विनाशम् ।

अधिकसंयोगः :–

नितान्तनारीजनसङ्गमेन चाक्षेपकाद्याः प्रभवन्ति रोगाः

---

[1]विधवारोग्यशमनं आयुषः क्षयकारिणी–आ ।

[2]अशस्त–आ । [3]अशुचाया मतिहरः ऋतुः पुण्यविनाशनः–आ ।

[4]रजस्वला...शुक्र.श्मरी सा (६८३) एते आ–पाठे न सन्ति ।

पाण्ड्वामयार्शोज्वरकासशूलश्वासक्षयव्याधिमुखाः प्रभूणाम् ।
॥ ३८० ॥

समसंयोगः :–

यथोक्तमायुर्लभते मनुष्योजराविर्योगं बलवर्णकारि
....पचितैश्च मांसैः स्त्रीणां विलासेष्वपराजितानाम् ।

समयोगवर्जाः :–

क्रुध्दः क्षुत्परिपीडितोऽतितृषितो मध्याह्न ....
स्थित्वा ··· विरमेत ··· भवेत् शुक्रस्य भूयान् क्षयः
वायोः कोपमपि प्रयाति सरुजः प्लीहामयैः....
मृत्युश्चोदयते कफश्च पवनः काले निषिद्धे पुनः ।

योनिदोषी :–

तिर्यग्योनावयोनौ रमयति वनितां दुष्टयोनौ च नारीं
सञ्जायन्तो···समुदयति मरुत् क्षीयते शुक्र···
उच्चारे मूत्र ··· धृतां तम ···
त्युक्त्वा .... रमयति ··· माशु शुक्राश्मरी सा ।

रूपवयोगुणसंयुक्ता शीलवती शुभा युवती
कामुककाम्याकृष्टा भूषवती विभूषाढ्या ।

दासीस्त्रीसङ्गमः :–

[1]धर्महीनं शरीर··· पापसङ्कीर्णकारणम्
वा ··· हरं चैव दासीसङ्गम ···।

---

[1]धर्महीनं... मानम् (६८९) एते आ–पाठे न ।

आयुष्यवीर्यनाशाय सर्वपापकरं नरः
तेजोबलहरं चैव कुम्भीपाकं न संशयः ।

वेश्यास्त्रीसङ्गमः :–

··· भोगप्रवीणत्वं सर्वधातुविवर्धनम्
बलपुष्टिविकारश्च तेजोधातुबलप्रदम् ।

संयोगप्रचारः :–

शर्करामधुखर्जूरं शर्कराक्षीरगोस्तनी
मल्लिकाजातिकेतक्यः कस्तूरी हिमचन्दनम्

बाह्लीकं गुरु ··· ताम्बूलसलिलं तथा ।

ऋतुविशेषाः :–

त्रिभिस्त्रिभिर्वासरकैरुपेयान्निशासु नारीं च मनोनुकूलाम्
ऋतुष्वशेषेषु निदाघकाले पक्षेण पक्षेषु हिताय मानम् ।

पाठान्तरे :–

त्र्यहाद्वसन्तशरदोः पक्षाद्वृष्टिनिदाघयोः
श्रमक्लमोरुदौर्बल्यं पुंस्त्वेन्द्रियबलक्षयः । ॥ ६९० ॥

अपर्वमरणं [1]च स्यादन्यथा गच्छतः स्त्रियम्
[2]सन्ध्ययोरपि पर्वसु गच्छन् आयुरत्र भजतीत्यवसेयम् ।

[3]स्त्रीसङ्गमाद्विनश्यन्ति सन्ध्ययोरपि पर्वसु ।

---

[1]चास्य–उ । [2]सन्ध्ययोः···सेयम्–इति आ पाठ एव ।
[3]स्त्रीसङ्ग...रेणुपङ्कैः (७१०) एते आ–उ पाठयोर्न ।

योनिदुर्गन्धप्रतीकारः :--

कुष्ठकमलनीलोत्पलसाधिततैलेन पूरणं योनेः
अभयागुडधू ... निम्बक्काथेन धौतयोनेर्वा ।

पिष्ट्वा जातिकुसुमं यष्टिमधुकं पञ्च पल्लवानथवा
तैलेन पूरण ... दुर्गन्धघ्नं चातपाभितप्तेन ।

देहदौर्गन्ध्यं हरति निदाघे निहितं घर्मदिने देहदौर्गन्ध्यम्
बिल्वशिलासमभागलेपाद्भुजमूलगन्धमपहरति ।

शिरीषलामज्जकनायलोध्रैस्त्व ... संस्वेद ... प्रदेहैः
पत्राम्बुलोहामयचन्दनानि शरीरदौर्गन्ध्यहरः प्रदेहः ।

लोध्र...शिरीषकपद्मकचूर्णेन मिलितदेहस्य
ग्रीष्मेऽपि त्वग्दोषाः स्वेदप्रभवा न जायन्ते ।

मुखदौर्गन्ध्यस्य परिणततिन्त्रिणिका ......
आस्वादिता च सकृदपि मुखगन्धं सकलमपनयति ।

जातीफलजातिपत्रकफणिज्जवाह्लीककुष्ठसरचिता
अपहरति पूतिगन्धं मुखविवरपरिस्थिता गुलिका ।

पिप्पल्येला मुस्तापराङ्गयष्ट्या ... कुष्ठमित्येतैः
गुलिका पूति ... भेषजं मुखधारणे । ॥ ७०० ॥

कार्या जातिफलैला पिप्पललाजकमधुमातुलुङ्गदललेहः
सतताभ्यासात्कुरुते किन्नरमधुरस्वरञ्च नरः ।

... तिलसर्षपरजनिद्वयकुष्ठ कृतोद्वर्तनानि संस्ट ...
कान्तिहसित ... ... ।

. . . कृष्णातिलकुष्ठ . . . जीरकैः समं पयसा

लेपो वदनसुगन्ध .... नाशयति ।

अपनयति बदरमज्जगुडमधुनवनीतयुतोऽभ्यङ्गम्

लेपेन .... जक्षीरेण पिष्टं वा ।

. . . . पिटका . . . लेपः

गोरोचनान्वितेन च लेपो मरिच . . . ।

उत्पलमुत्पलकुष्ठप्रियङ्गुकालेय ... धरम् ।

मज्जा .... मुद्वर्तनशून्यं करोति शतपत्रसङ्काशं देह .... ।

... ...मात्रे चाविकं पयः तदुत्थनवनीतोक्तो देहस्य....।

हिमशिशिरवसन्तग्रीष्मवर्षाशरत्सु स्तनिततपननवाम्बु

सुखमनुभव राजन् ! त्वद्रिपुर्यातु नाशम् ।

... ... रेणुपङ्कैः । ॥ ७१० ॥

[1]ग्राम्यधर्मे त्यजेन्नारी मनुत्तानां रजस्वलाम्

अप्रियामप्रियाचारां दुष्टसङ्कीर्णमेहनाम् ।

अतिस्थूलकृशां सूतां गर्भिणीमन्ययोषितम्

वर्णिनीमन्ययोनिश्च गुरुदेवनृपालयम् ।

चैत्यश्मशानायतनचत्वराम्बुचतुष्पथम्

पर्वाण्यनङ्गं दिवसं शिरोहृदयताडनम् ।

---

[1]एते उ पाठ एव । (ग्राम्य...सङ्गमम्)

अत्याशितोऽधृतिःक्षुद्वान् दुःस्थिताङ्गः पिपासितः
बालो वृद्धोऽन्यवेगार्तस्त्यजेद्रोगी च [1]सङ्गमम् ।

[2]किञ्चिदुष्णं मनोहर्षं दीपनं देहलाघवम्
नाडीषु निर्मलत्वञ्च बालास्त्रीभोगलक्षणम् ।

पञ्चेन्द्रियप्रीतिकरञ्च सौख्यं दोषक्रियघ्नं बलपुष्टिदञ्च
केकीगतिर्नाडिषु यौवनस्त्रीसम्भोगचिह्नं समुदाहरन्ति ।

ज्ञानं च दीपनत्वञ्च मन्मथोद्रेककं लघु
राजहंसगतिर्नाडी प्रौढस्त्रीभोगलक्षणम् ।

मान्द्यं जडत्वं मन्दाग्निररुचिर्मारुतोद्भवः
महिषीगतयो नाड्यः वृद्धस्त्रीभोगलक्षणम् ।

नारीपीनपयोधरोऽनिलहरो बिम्बाधरः पैत्यजित्
तृष्णाश्लेष्मविनाशनं सुखकरं चालिङ्गनं चुम्बनम्
दोषाणां त्रितयं व्रणप्रशमनं दुःखस्य विच्छेदनं
नानादोषहरं सुदीपनकरं भूपैस्सदा भुज्यते ।

सम्भोगं लघुदीपनं च कुरुते वर्गत्रयं वर्धते
लावण्यं [3]कुरुते विकाररहितं चात्यन्तमत्यन्तरम्
प्रत्यक्षप्रतिकूलवायु जडता[4] सर्वाङ्गतापप्रणुत्
सर्वज्ञं कुसुमोपमानसहवो वाग्जालबुद्धिप्रदम् । ॥ ७२० ॥

---

[1]मैथुनं–क । [2]किञ्चि...धाम (७२२) एष पाठः आ ग्रन्थ एव ।
[3]विदधे विक शसह्दिावर्तवातोदरे (?) क-पाठः ।
[4]तॉं सर्वं च तापं छिनत्सर्वघ्न कुशलोपमानवहवो–क ।

वातं जयत्यतिघनेन कुचेन मर्दः
पैत्यं जयन्ति वनिताधरपानयोगाः
शैत्यं जयत्यतिघनेन रतेन तेन
प्रायस्त्रिदोषशमनं वपुषा तरुण्यः ।

स्नानानुलेपनहिमानिलखण्डकाद्यै?
शीताम्बुदुग्धदधियूषरसाः प्रसन्नाः
सेवेत चानुशयनं विरतौ रतस्य
तस्यैवमाशु वपुषः पुनरेति धाम ।

स्त्रीसम्भोगगुणाः

वयोभेदेन :–

बाला हि भुक्ता बलमातनोति पतिं श्लथाङ्गं तरुणी करोति
प्रौढा जरां निश्चयमेव सूते वृद्धा नितान्तं बलजीवहानिम् ।

भावप्रकाशे :–

बालेति गीयते नारी यावद्वर्षाणि षोडश
ततस्तु तरुणी ज्ञेया द्वात्रिंशद्वत्सरावधि ।

तदूर्ध्वमधिरूढा स्यात्पञ्चाशद्वत्सरावधि
वृद्धा तत्परतो ज्ञेया सुरतोत्सववर्जिता ।

निदाघशरदोर्बाला हिता विषयिणो मता
तरुणी शीतसमये प्रौढा वर्षावसन्तयोः ।

नित्यं बाला सेव्यमाना नित्यं वर्धयते बलम्
तरुणी ह्रासयेच्छक्तिं प्रौढा भावयते जराम् ।

दिवासन्ध्यं वर्जयित्वा तथा पर्वदिनेषु च
रात्रौ व्यवायं कुर्वीत योषितं यौवने स्थिताम् ।

सम्भोगवर्ज्याः :–

वर्जयेत्तु पयःपानं सुरतान्ते च निद्रता
प्रातः काले तु ताम्बूलं त्रयः स्वर्गेऽपि दुर्लभाः ।

अक्षिरोगी चातिसारी कुष्ठी मेही तथा क्षयी
उदरी पाण्डुरोगी च वर्जयेत्सुरतं नरः । ॥ ७३० ॥

वातरोगी गजारोही चाध्वगः काममोहितः
स्थूली च श्लेष्मरोगी च प्रशस्ताः सङ्गमे नराः ।

कन्दर्पयुद्धे प्रथमप्रभावा चिरेण तृप्तिं वनिता लभन्ते
शीघ्रं द्वितीये कृतभूरिभावा पुसः क्रमोऽयं विपरीत उक्तः ।

अधरामृतरसेन पित्तं शमयति वातं घनस्तनालिङ्गनेन
अनवरतरतेन कफं त्रिदोषशमनं वपुस्तरुणीनाम् ।

एकक्रीडा गुणोत्कृष्टा द्विक्रीडं पैत्यमेव च
त्रिक्रीडं धातुनष्टं च चतुःक्रीडं च व्याधयः ।

प्रातः काले तु जाड्यं वा मध्याह्ने बलनाशनं
रात्रौ गुणविशेषेण इत्येतत्क्रीडलक्षणम् ।

स्मृतिमेधायुरारोग्यबुद्धीन्द्रिययशोबलैः
अधिका मन्दजरसो भवन्ति स्त्रीषु संयताः ।

[1]अशीतेनाम्भसा स्नानं पयःपानं वयःस्त्रियः
इत्येते मानुषाः ! पथ्यं स्निग्धमुष्णञ्च भोजनम् ।

अन्नादष्टगुणं पिष्टं पिष्टादष्टगुणं पयः
पयसोऽष्टगुणो मांसो मांसादष्टगुणं घृतम् ।

एकभुक्तं एकका .... इन्द्रिय बलक्षयम्
मलान्यल्पा ... च निद्रा च वातपित्तप्रकोपनम् ।

पयः पीत्वा स्त्रियं गच्छेत्स्त्रियं गत्वा पयः पिबेत्
सद्यो बलकरं क्षीरं सद्यो बलहराः स्त्रियः । ॥ ७४० ॥

बलं मांसं वयः सर्पिः(तैलं तेजो घृतं प्राणं) क्षीरमायुष्यवर्धनम्
शाकन्तु जनयेद्व्याधीन्मांसं मांसेन वर्धते ।

बालार्कः प्रेतधूमश्च वृद्धस्त्री पल्वलोदकम्
रात्रौ दधि च भुञ्जीत आयुःक्षीणं दिने दिने ।

वृद्धार्को होमधूमश्च बाला स्त्री निर्मलोदकम्
रात्रौ क्षीरं प्रभुञ्जीत आयुर्वृद्धिर्दिने दिने ।

चत्वारि खलु कार्याणि सन्ध्याकालेषु वर्जयेत्
आहारो मैथुनं निद्रा स्वाध्यायश्च चतुर्विधः ।

आहाराज्जायते व्याधिः क्रूरगर्भश्च मैथुनात्
श्रियं हरति वै निद्रा स्वाध्यायान्मरणं ध्रुवम् ।

---

[1]अशीते . नश्यन्तु (७४९), एते अ–पाठे न। एतस्मात्समाप्त्यन्तो भागः– उ पाठे न।

वर्जनं चाप्यगम्यायाः पतितैः सङ्गवर्जनम्
क्रोधस्य वर्जनं चैव आत्मस्तुतिविवर्जनम् ।

ललाटे हृदि नासायां गात्रसन्धिषु कक्षयोः
स्वेदस्सञ्जायते यस्य बलार्थं तदुदीरितम् ।

होमं जपं च स्वाध्यायमभ्यङ्गं हरिचन्दनम्
भोजनं मैथुनं यानं प्रदोषेष्वष्ट वर्जयेत् ।

अव्यायाम .... वसन्तसमये ग्रीष्मे व्यवायः प्रियः
...प्रावृषि पल्वलाम्भाशिलयोः कूपोदके द्वेषिणः

....   हेमन्तनिद्रालसा
स्तैर्दोषैरपचीयमानवपुषा नश्यन्तु ... ।

एकशायी द्विभोजी च षण्मूत्री द्विपुरीषकः
स्वल्पसङ्गमकारी च शतवर्षाणि जीवति ।   ॥ ७५० ॥

[1]षण्मूत्रं द्विपुरीषं च द्विभुक्तं त्वेकसङ्गमः
द्विक्षुतं पञ्चधा वायुः षडेते स्वस्थदेहिनाम् ।

आर्द्रमत्स्यो घृतं क्षीरं व्यायामस्तरुणास्त्रियः
जाङ्गलामिषमांसानि सद्यो बलकराणि षट् ।

शुष्कमत्स्याः स्त्रियो वृद्धाः बालार्कस्तरुणं दधि
[2]प्रत्यूषे मैथुनं शाकं सद्यो बलहराणि षट् ।

---

[1]राषा आ–उ पाठ एव ।
[2]रात्रौ शाकं रतं प्रात.-इति आ ।

[1]सद्योबलहरं त्रीणि तैलमातपसङ्गमौ
सद्योबलकरं त्रीणि वारि वारिचरः पयः ।

शोकश्रमक्रोधभीति शरीरोष्णाश्शिरोगताः
केशे सदा सञ्चरन्ति पलितं सम्भवत्यतः ।

तद्वातात्स्फुटितश्यामकरं रूक्षं दलप्रभम्
पैत्यात्सदाहं पीताभं कफात्स्निग्धं त्रिवृद्धिमत् ।

स्थूलं सशुक्लं सर्वैस्तु विद्याद्व्यामिश्रलक्षणम्
शरीरपरिणामादीन् रसायनमपेक्षते ।

ऊर्ध्वमूलमधःशाखं ऋषयः पुरुषं विदुः
मूलप्रहारिणस्तस्माद्रोगश्शीघ्रतरं भवेत् ।

प्रभाते सङ्गमे काले प्रस्रावे दन्तधावने
स्नानभोजनवेलायां मौनं षट्सु विधीयते ।

अन्नदाहं हरेन्मांसं अम्बुदाहं शोणितम्
कामदाहं हरेच्चक्षुः अनिद्रा रोगकारिणी । ॥ ७६० ॥

अश्वारोहे पयःपानं गजारोहे तु सङ्गमः
शिबिकायामङ्गमर्दः पादचारे तु भोजनम् ।

अत्यम्बुपानादति सङ्गमाच्च
स्वप्नाद्दिवा जागरणाच्च रात्रौ

---

[1]सद्यो...जरा (७६३) एते आ–पाठ एव ।

निरोधनान्मूत्रपुरीषयोश्च
षड्भिःप्रकारैः प्रभवन्ति रोगाः ।

अध्वा जरा मनुष्याणामनध्वा दन्तिनां जरा
असङ्गमो जरा स्त्रीणां सङ्गमो वाजिनां जरा ।

क्षुतं वक्त्रेण संहृत्य जृम्भणं नासया पुनः
बिन्दुसंरक्षणे चैव शतवर्षाणि जीवति ।

विचार्य देशं दोषञ्च वयस्सत्वं यथाबलम्
जलपानमुषःकाले कृत्वा वर्षशतं नयेत् ।

[1]अम्भसः प्रसृतान्यष्टौ पिबेदनुदिते रवौ
वातपित्तकफान् जित्वा जीवेद्वर्षशतं सुखी ।

घृतेन वर्धते बुद्धिः बलं क्षीरेण वर्धते
तैलेन वर्धते कान्तिः शुक्रं गोष्ठेन वर्धते ।

भुक्त्यन्ते च रतान्ते च पानीयं प्रपिबेन्नरः
तयोराद्यन्तयोरन्तर्जलमाशु त्यजेद्बुधः ।

अभुक्त्वा तु दिवानिद्रा पाषाणमपि जीर्णयेत्
भुक्त्वा यदि दिवा निद्रा हन्त्यग्निं कुरुते कफान् ।

दिवास्वापं न कुर्वीत मिथ्यावादं न कारयेत्
दिवा स्त्रीसङ्गमे नृणां [2]आयुःक्षय उदीरितः । ॥ ७७० ॥

---

[1]अभ्यास...कफान् । एते आ पाठ एव ।
[2]आयुःक्षीणं दिने दिने– आ ।

परद्रव्यं परस्त्रीं च परनिन्दां तथैव च
आमित्रभाषणं शाठ्यं [1]परद्रोहस्य वर्जनम् ।

असत्यवर्जनं कार्यं परद्रोहस्य वर्जनम्
वर्जनं चाप्यगम्यायाः [2]पतितैः सङ्गवर्जनम् ।

[3]असूयावर्जनं शाठ्यं पतितैस्सङ्गवर्जनम्
क्रौर्यस्य वर्जनञ्चैव आत्मस्तुतिविवर्जनम् ।

अनृतं न वदेद्धीमान् प्राणैः कण्ठगतैरपि
धर्मनाशो भवेदस्य प्रयाति नरकं ध्रुवम् ।

अमृतं सत्यमित्याहुः असत्यं विषमुच्यते ।

धर्मशास्त्रं तु सततं [4]पुराणश्रवणं तथा
कारयेद्विधिना सम्यगात्माभ्यासं हि नित्यशः ।

[5]दानं मनोरमं कार्यं इष्टापूर्तस्य वर्धनम्
अशेषदेवताभक्तिर्गोषु विप्रेषु तर्पणम् ।

शुश्रूषणं गुरुस्त्रीणां तपस्तीर्थेषु मज्जनम्
विद्यायास्सेवनं चैव सततं साधुसङ्गमः ।

दीनान्धकृपणानाञ्च भ्रातॄणां चैव पोषणम्
कारयेत्सततं भक्त्या कीर्तिलक्ष्मीविवृद्धये ।

अनक्षरज्ञाननरेण भाषणं
अनादरं दुष्प्रभुसेवनञ्च

---

[1]स्त्रियालापं च वर्जयेत्—आ । [2]अभक्ष्याणां च भक्षणम् आ ।
[3]असूया...रपि । आ—पाठ एव । [4]पुराणं शृणुयात्ततः—आ ।
[5]दानं...विभूतयः—एते आ—पाठ एव ।

आलिङ्गनं लम्बपयोधराणां
प्रत्यक्षदुःखं त्रयमेत्र भूमौ । ॥ ७८० ॥

भुज्यते रूक्षमशनं सुप्यते सुन्दरीं सह
पद्भ्यामाक्रम्यते पन्थाः किंमितः पातकं परम् ।

अव्यवसायिनमलसं दैवपरं साहसाच्च परिहीनम्
वृध्दमित्र पतिं तरुणी नेच्छत्युपगूहितुं लक्ष्मीः ।

रिक्तपादाभिगमनं मानहीनं तु भोजनम्
अविवेकिनृपे सेवा किमतः पातकं परम् ।

गोशतादपि गोक्षीरं प्रस्थं धान्यशतादपि
प्रासादादपि शय्यार्थं शेषाः परविभूतयः ।

हिताय राजपुत्राणां सज्जनानां विशेषतः
चारुचर्या प्रिया श्रेष्ठा रचिता भोजभूभुजा । ॥ ७८५ ॥

इति भोजराजकृता

चारु चर्या समाप्ता

शुद्धिपत्रम्

पृष्ठम्	पङ्क्तिः	अशुद्धम्	शुद्धम्
२	१	धन्त	दन्त
३	४	द्वादज्ञ	द्वादश
४	७	रङ्गल	रङ्गुल
४	१०	मन्त्र	मन्त्रः
४	१३	गुणा	गुणाः
७	३	गण्डुष	गण्डूष
७	७	विधि	विधिः
८	१	निषेध	निषेधः
९	१५	पक्षाम्यङ्गं	पक्षाभ्यङ्गं
१०	१८	जीणिर्णभिः	जीर्णिभिः
१४	१	जाञ्झा	झञ्झा
१५	११	विप्रषु	विप्रेषु
१६	६	वस्तं	वस्त्रं
१६	१८,२०	नृणा	नृणा
२०	५	वस्त्रभा	वस्त्रमा
२०	६	देवभ्यो	देवेभ्यो
२०	१६	षिद्धं	विद्धं
२१	१, १२, १४	कम्ब्रल	कम्बलः
२१	३	जञ्झा	झञ्झा
२२	१५	अजनं	अजिनं
२२	१८	नृणां	नृणां

२३	१०	गुणा	गुणाः
३०	१६	त्रिदोषन्	त्रिदोषान्
३४	२	पित्तावि	पित्तवि
३६	२१	समु	समृ
३९	१८	लक्षभी	लक्ष्मी
४०	५	अयु...म	आयु....म्।
४०	७	बर्हवञ्शिनं	बह्वाशिनं
४५	१	लेप	लेपः
४५	१२	कुङ्क	कुङ्कु
४५	१४	तत्य	तस्य
४७	६	लेपयत्	लेपयेत्
४८	३	काना	नाना
४८	९	प्रीतिंर्लोक	प्रीतिं लोक
४८	१४	तश्च	ततश्च
४८	१५, २०	कुङ्क	कुङ्कु
४९	१०	(धन–क)	(घन–क)
४९	१२	कदचि	कदाचि
५०	८	भस्मं	भस्म
५०	१४	लघु	लधुः
५०	१५	मृदु बृंहणी	मृदुबृंहणी
५१	७	गन्धि	गन्ध
५३	६	निस्नेहं	निःस्नेहं
५६	७	हृद्यं	हृद्यं
५८	१९	नित्य	नित्यं
६०	१	कुर्ची	कूचो

६३	१०	दायी	दायि
६३	१	अत्याहारद्ध	अत्याहाराद्ध
६४	८	गुरुणा	गुरूणा
६६	१८	वातपि:	वातापि:
६८	३	तृतीय	तृतीये
७१	१०	हारी	हारि
७७	१७	लघु	लघु:
८८	१०	राग	रोग
८८	१७	कुष्टान्	कुष्ठान्
८९	१३	त :	तत:
८९	१८	ष्टीवनम्	ष्ठीवनम्
९५	२१	स्त ।	स्त: ।
९६	२०	औशिरं	औशीरं
९९	६	जञ्झा	झञ्झा
१०५	११	था	तथा
१०६	६	आयुश्री	आयु:श्री
११३	१३	पुसः	पुंसः

—:—